शाण्डिल्यभक्ति सूत्रम्

॥ श्रीः ॥

भारत-मनीषा-संस्कृत-ग्रन्थमाला

Bharata Manisha Sanskrit Series

प्रधानसंपादकः

सातकडिमुखोपाध्यायः

General Editor

SATKARI MUKHOPADHYAYA

तत्रेदं

द्वितीयं पुष्पम्

No. 2

ŚĀṆḌILYA BHAKTISŪTRA

Being the Aphorisms ascribed to

MAHARṢI ŚĀṆḌILYA

With

The Commentary named Śatasūtrīyabhāṣya

of

Śrīmat Svapneśvara Ācārya

CRITICALLY EDITED

WITH A HINDI COMMENTARY

BY

Dr. SRIKRISHNA MANI TRIPATHI

Head of the Department of Purāṇa-Itihāsa,

Sanskrit University, Varanasi

स्वाध्यायान्न प्रमदितव्यम्
भारत-मनीषा-वाराणसी

BHARATA MANISHA

VARANASI (INDIA)

1973

॥ श्रीः ॥

शाण्डिल्यभक्तिसूत्रम्

श्रीमत्स्वप्नेश्वराचार्यविरचितशतसूत्रीय-भाष्यसहितम्

तच्च

वाराणसेयसंस्कृतविश्वविद्यालये पुराणेतिहासविभागाध्यक्षपदमलंकुर्वता

साहित्यरत्न-वेदान्त-सांख्ययोग-धर्मशास्त्रपुराणेतिहासाचार्येण

एम० ए०, पी०-एच्० डी० इत्युपाधिधारिणा

डॉ० श्रीकृष्णमणित्रिपाठिना

स्वकृत-हिन्दी-टीकया विशदीकृत्य

संशोधितम्

स्वाध्यायान्न प्रमदितव्यम्

भारत-मनीषा-वाराणसी

भारत मनीषा

वाराणसी (भारतवर्षम्)

वि० सं० २०३०

© BHARATA MANISHA
Publishers of and Dealers in Oriental Books
AMRUMAL KATRA : D 47/203 GODOWLIA
VARANASI (INDIA)

प्रथमं संस्करणम् : वि० सं० २०३०
First Editi n : 1973

मूल्यं RS PRICE 0

वाराणस्यां भारतमनीषासंचालकेन श्रीयादवदासभट्टाचार्येण प्राकाश्यं नीतं तथा वाराणसी-गोलघरस्थ-स्वस्तिक-मुद्रणालयाधिकारिणा श्रीराजेशशर्मणा मुद्रितम् ।
Published by Jadab Das Bhattaclarya for Bharata Manisha, Varanasi and Printed by Sri Rajesh Sharma at Swastik Madranalaya, Golghar, Varanasi.

प्रधानसंपादकस्य

निवेदनम्

श्रीमन्महर्षिशाण्डिल्यप्रणीतस्य भक्तिसूत्रस्य श्रीमत्स्वप्नेश्वराचार्यकृतभाष्यसहितस्यास्मदाचार्यदेशीयैः डॉ० श्रीकृष्णमणित्रिपाठिमहोदयैः संशोधितस्य तत्कृतहिन्दीटीकया समुपवृंहितस्येदं संस्करणं विदुषां भक्तानाञ्च करसरोरुहेपूपायनीकुर्वतां भृशं मोमुद्यन्ते नश्चेतांसि ।

कलौ भक्तिरेवान्यनिरपेक्ष उत्कृष्टश्च मोक्षोपाय इति न तिरोहितं शास्त्रपारदृश्वनां विदुषां साधकानाञ्च । भक्त्युपासनाया मूलमुपनिषदामुपसनाकाण्ड एवोपलभ्यते । श्रीमन्महर्षिकृष्णद्वैपायनः श्रीमद्भागवतपुराणे भक्तितत्त्वं साङ्गोपाङ्गमुपदिष्टवान् । श्रीमद्रामानुज-वल्लभ-निम्बार्क-मध्वप्रभृतिभिर्वेदान्ताचार्यैर्वेदान्तव्याख्यानावसरे भक्तेः प्राशस्त्यं प्रदर्शितम् । किन्तु ततः पूर्वमपि नारदशाण्डिल्यादिभिर्महर्षिभिः स्वतन्त्रदर्शनतया भक्तिशास्त्रं प्राणायि, प्रतिपादितं च ज्ञानकर्मभ्यां भक्तेः श्रेयस्त्वम् ।

शाण्डिल्यप्रणीतभक्तिसूत्रस्य शतसूत्रीयभाष्यापराभिधव्याख्याने श्रीमत्स्वप्नेश्वराचार्यो दर्शनशास्त्रत्वेनैव विमर्शः कृतो यः खलु यथा भक्तानां तथैव दर्शनशास्त्रपरिशीलिनामपि भूयसे मोदाय भवति ।

बहोः कालात् सभाष्यस्यास्य शाण्डिल्यभक्तिशास्त्रस्य किमपि संस्करणं नोपलभ्यते स्म । ग्रन्थान्तरपरिशिष्टरूपेण यद्यप्येतदन्यत्र मुद्रितं वर्तते तथापि यथेष्टमसंशोधितत्वान्महार्घत्वात् स्वनाम्ना प्रसिद्धेरभावाच्च चेखिद्यन्ते स्म तत्पिपठिषूणां चेतांसि । वाराणसेयसंस्कृतविश्वविद्यालये पुराणेतिहासविभागाध्यक्षपदमलंकुर्वन्तो विद्वदग्रेसराः डॉ० श्रीकृष्णमणित्रिपाठिमहोदया भूयसा श्रमेण मूलं भाष्यं च सुनिपुणं संशोध्य, भाष्यस्थोद्धृतवचनानामाकरस्थलानि विनिर्दिश्य, स्वकृतप्राञ्जलहिन्दीटीकया भाष्यानुकूलं मूलग्रन्थाशयं च विशदीकृत्य प्रस्तुतं संस्करणं निर्मितवन्तः ।

भक्तिशास्त्रानुरागिणो विद्वांसः कृपाकटाक्षपातेन सफलयिष्यन्ति संपादक-महाभागानां श्रमं समुत्साहयिष्यन्ति चास्मानेतादृशग्रन्थप्रकाशनायेति बाढ-माशास्महे ।

कृतमतिपल्लवितेन वाचमिति

निवेदयति

विदुषामाश्रवः

सातकडिशर्मा मुखोपाध्यायः

वाराणस्याम्

श्रीगुरुपूर्णिमायाम्

२०६० वै०

प्रस्तावना

अथेदं मुद्रयित्वा प्रकाश्यते शतसूत्रीयभाष्यापरपर्यायस्वप्नेश्वरभाष्यसमन्वितं हिन्दीभाषायुतञ्च भक्तिशास्त्रीयं शाण्डिल्यभक्तिसूत्रम् । ऋग्वेद[1]-उपनिषद्[2]-जया-संहिता[3]-शाण्डिल्यसंहिता[4]दिपर्यालोचनया परिज्ञायते यत्सूक्ष्मरूपेणैभ्यो विनिर्गतं भक्तिस्वरूपं, किन्तु सुगमोपायं भक्तेः शास्त्ररूपं देवर्षिनारद-महर्षिशाण्डिल्य-प्रभृतिभिरेवाविष्कृतमस्ति । एतत्सूत्रालोचनतः स्फुटीभवति यदाभ्यां भक्तेरा-चार्याभ्यां देवर्षिनारद-महर्षिशाण्डिल्याभ्यां पूर्वमपि भक्तिशास्त्रविषयेऽनेके आसन् आचार्यास्तद्ग्रन्थाश्च किन्त्वस्माकं दौर्भाग्यात्, समयस्य वैपरीत्यात्, स्थितेः पारवश्यात्, हिन्दुधर्मेऽनेकाक्रान्त्युपस्थितेश्च तेषामेकस्यापि ग्रन्थरत्नस्य दर्शनं साम्प्रतं न जायते ।

नारदभक्तिसूत्रे स्मृता भक्तेराचार्याः सन्ति पाराशर्य-गर्ग-शाण्डिल्य-ब्रह्मकुमार-व्यास-शुक-विष्णु-कौण्डिन्य-शेष-उद्धव-आरुणि-बलि-हनुमद्विभीषणाः[5] तथा शाण्डिल्य भक्तिसूत्रे येषां पूर्वाचार्याणां चर्चा विद्यते ते सन्ति काश्यप-बादरायण-शाण्डिल्य-जैमिनिमुनयः ।[6] तत्र देवर्षिनारदेन भक्तिविषयकाणि चतुरशीतिष संख्याकानि सूत्राणि प्रणीतानि, महर्षिणा शाण्डिल्येन तु शतं (१००) द्व्यधिकशतं (१०२) वा सूत्राणि निर्मितानि सन्ति । एतयोर्द्वयोः नारदसूत्रापेक्षया शाण्डिल्यभक्तिसूत्राण्येव मन्दमतीनां सुमतीनां समनुग्राह्याणि सन्तीति सुप्रथितं भक्तिरहस्यविदां विदुषाम् ।

---

(१) सखा पिता पितृसमः पितॄणां कर्तेमु लोकमुशते वयोधाः । ऋ० वे० ४।१७।१७

(२) यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ श्वे० उ० ६।२३

(३) काण्वीं शाखामधीयानौ वौपगायनकौशिकौ ।
प्रपत्तिशास्त्रनिष्णातौ स्वनिष्ठानिष्ठिताबुभौ ॥ ज० सं० प० ३

(४) (क) तैत्तिरीया जगुश्चोर्ध्वं पुण्ड्रं वै श्रौतभस्मना ।
वर्णाश्रमाचारवता धार्या तुलसिमालिका ॥
शिखोपवीतवन्नित्या जगावाथर्वणश्रुतिः । शां० सं० ३।४

(ख) पादोदकं हरेः पेयं पूजान्तेऽपि दिने दिने ।
सर्वतीर्थसमं तद्धि प्राह बौधायनश्रुतिः ॥ शां० सं० ३।८

(ग) उरुक्रमस्य पादाब्जपाथो यो न पिबेन्नरः ।
विष्णोर्लोकं स न वसेदिति ऋक् शाश्वती श्रुता । शां० सं ३।९

(५.६) नारदभक्तिसूत्रे १६,१७,१८,१९,३०,८३ तथा शाण्डिल्यभक्तिसूत्रे २।१।३,४,५, २।२।६ सूत्राणि द्रष्टव्यानि ।

अत्र मोक्षोपायत्वेन प्रसिद्धानां भक्ति-ज्ञान-कर्मणां गौणमुख्यभावं विचार्य भक्तेरेव श्रेष्ठत्वं प्राशस्त्यं सुगमत्वं सरलत्वञ्च विवेचितमास्ते। वस्तुत करालेऽस्मिन् कलिकाले मन्दमतीनां सकलं कर्म कर्तुमसमर्थानां कृपाणधारारोहणवद्दुर्गमं ज्ञानमर्जयितुमशक्तानां पुंसां भक्तिमन्तरा नान्यः कश्चनोपायो विद्यते चित्तशान्तये शाश्वतसुखप्राप्तये च। अतःस्तत्तच्छास्त्रेषु भक्तेः प्राशस्त्यं गीतमस्ति। भक्ति विना न केनापि साधकेन ज्ञानस्य सम्यक् साधनं सम्पादयितुं शक्यते, नापि किमपि कर्मानुष्ठातुं पार्यत इति सर्वथा भवति सर्वत्र भक्तेरावश्यकत्वमनिवार्यत्वञ्च।

शाण्डिल्यसूत्रव्याख्या

महर्षिणा शाण्डिल्येन प्रणीतानां सूत्राणां गूढार्थाभिव्यक्तये स्फुटतात्पर्यावगतये च बहुभिर्विद्वद्भिः प्रमेयबहुला व्याख्या विहिता विद्यन्ते। भक्तिचन्द्रिकायां श्रीस्वामिना नारायणतीर्थेनाऽनेकेषां टीकाकाराणां मतानि प्रदर्श्य तेषां साधुत्वादिकं च सम्यगस्ति विवेचितम्। तासु व्याख्यासु तिस्रो व्याख्या मुख्या विद्यन्ते। (१) आचार्यस्वप्नेश्वरकृतं शतसूत्रीयभाष्यापरपर्यायकं स्वप्नेश्वरभाष्यं सर्वप्राचीनं स्वल्पाक्षरं परिमितैः शब्दैः सरलतया सूत्राणां वास्तविकं रहस्यं बोधयति (२) द्वितीयं भाष्यं विपश्चिता भवदेवमिश्रेण विरचितं यत् समासतो गभीरभावमभिव्यनक्ति (३) तृतीया च व्याख्या श्रीस्वामिना नारायणतीर्थेन निर्मिता भक्तिचन्द्रिकाख्या पूर्वोक्तभाष्यद्वयतो बहुषु स्थलेषु वैलक्षण्यं बिभ्रती मूलमर्थं वैशद्येन विवृण्वती, आचार्यस्वप्नेश्वरकृतं भाष्यं विशदयन्ती श्रीमद्भागवतानुसारिणी, अपेक्षितसकलार्थं सम्पादयन्ती भक्तिरहस्यजिज्ञासूनामभिप्रेतमर्थजातं संसाधयति। आसु तिसृषु व्याख्यासु सूत्राणां सम्यगर्थप्रतिपादकं सकलभक्तिशास्त्रीयटीकापेक्षया प्राचीनं वाराणसेयसंस्कृतविश्वविद्यालयीयपुराणेतिहासाचार्यपरीक्षाया द्वितीयखण्डे अन्यत्र च पाठ्यपुस्तकत्वेन निर्धारितं श्रीस्वप्नेश्वरभाष्यं भगवद्भक्तिजिज्ञासूनां सौविध्याय परीक्षार्थिनां विद्यार्थिनाञ्च सौलभ्याय सम्पाद्य प्रकाशयितुमहं यत्नवान् जातः। नैतद्भाष्यमाचार्यवल्लभ-श्रीरामानुज माध्व-निम्बार्क-चैतन्यसम्प्रदायादिसम्बद्धभक्तिशास्त्रवत् तत्तन्मतसम्बद्धभक्तिस्वरूपप्रतिपादकं, नापि तत्तन्मतसम्मतभक्तिस्वरूपविरोधकं विद्यते, अपितु श्रीयतिवर्यमधुसूदनसरस्वतीविरचितभक्तिरसायनवद् विशुद्धभक्तिप्रवाहप्रतिपादयितृ सर्वाभिप्रेतार्थसाधकं प्रसिद्धं च वर्तते। अतो निरपेक्षतया सर्वसम्प्रदायश्रद्धास्पदं श्रीस्वप्नेश्वरभाष्यमिति निश्चप्रचम्।

भक्तिसूत्राणां वैशिष्ट्यम्

नारदभक्तिसूत्रापेक्षया शाण्डिल्यभक्तिसूत्रं भक्तिसम्प्रदाये विशिष्टं स्थानं बिभर्ति। अतएव तत्र द्वाभ्यां स्वप्नेश्वर-भवदेवमिश्राभ्यां पृथक् पृथक् स्वतन्त्रं

भाष्यद्वयं कृतं, श्रीस्वामिना नारायणतीर्थमहोदयेन च विशदभावपूर्णा व्याख्या निर्मिताऽस्ति। एवं भाष्यद्वयव्याख्याविभूषितस्य शाण्डिल्यभक्तिसूत्रस्य भक्तसमाजे महानस्ति प्रचारः प्रसारः समादरश्च। नारदभक्तिसूत्रे किमपि भाष्यं व्याख्यानं वा नेदानीं यावदवलोकितं, किन्तु तदीयानि केवलचतुरशीतिसूत्राण्येव दृष्टिपथमायान्ति, नारदभक्तिसूत्र-शाण्डिल्यभक्तिसूत्रातिरिक्तान्यपि कियन्ति भक्तिसूत्राणि साम्प्रतं दृष्टिगोचरतामायान्ति। तद्यथा श्रीहरिहरारण्यविरचितानि षड्विंशतिसंख्याकानि पराभक्तिसूत्राणि। श्रद्धेय म० म० पं० गोपीनाथकविराजमहोदयद्वारा टिप्पण-विवरणादिभिः सनाथीकृत्य सरस्वतीभवनग्रन्थमालातो मुद्रिते भक्तिमीमांसानामके ग्रन्थेऽज्ञातकर्तृकाणि द्व्यधिकशतानि सूत्राणि, भारतधर्ममहामण्डलतः प्रकाशिते दैवी-मीमांसादर्शने ३४२ सूत्राणि सत्यनारायणशर्मणो भक्तिसूत्रञ्च भगवद्भक्तानां हृदयान्यावर्जयन्ति।

भक्तिग्रन्थाः

एतद् भगवद्भक्तिसूत्रातिरिक्ता अनेकैर्भक्तशिरोमणिभिर्विद्वन्मणिभिर्भक्ति-विषयमधिकृत्य समये समयेऽनेके ग्रन्थाः प्रणीता विविधा निबन्धाश्च लिखिताः सन्ति। यत्रैतेऽतिप्रसिद्धाः प्रामाणिकाश्च सन्ति—

(१)	श्रीमधुसूदनसरस्वतीनाम्	भक्तिरसायनम्
(२)	श्रीस्वामिनारायणतीर्थानाम्	भक्तचन्द्रिकरणमाला
(३)	श्रीनृसिंहभारतीमहोदयानाम्	भक्तिसुधातरङ्गिणी
(४)	श्रीहरिहरानन्दसरस्वतीनाम्	भक्तिसुधा
(५)	श्रीरूपगोस्वामिनाम्	भक्तिरसामृतसिन्धुः (क)
		उज्ज्वलनीलमणिः (ख)
		दानकेलिकौमुदी (ग)
(६)	श्रीजीवगोस्वामिनाम्	वैष्णवतोषिणी (अ)
		षट्सन्दर्भः (आ)
(७)	श्रीगीतास्वामिविजयस्य	नवभक्तिरसायनम्
(८)	श्रीवोपदेवस्य	मुक्ताफलम्
(९)	श्रीरघुनाथशास्त्रिणः	भक्तितरङ्गिणी
(१०)	श्रीअनन्तदेवस्य	भक्तिनिर्णयः
(११)	श्रीसुरेश्वरमिश्रस्य	भक्तिकुसुमाञ्जलिः
(१२)	श्रीनारायणभट्टस्य	भक्तिसागरः
(१३)	श्रीरसिकोत्तंसस्य	प्रेमपत्तनम्

(१४) श्रीविट्ठलेशस्य भक्तिहंसः
(१५) श्रीलक्ष्मीधरस्य भगवन्नामकौमुदी

शाण्डिल्यपरिचयः

शाण्डिल्यभक्तिसूत्रस्य प्रणेता महर्षिः शाण्डिल्यः कस्मिन् प्रदेशे कस्मिन् काले किञ्च कुलमलङ्कृत्य स्वकीयया कृत्या संस्कृतसाहित्यस्य गौरवं वर्द्धितवानिति निर्णेतुं सुशकं नास्ति, यतो हि तत्तद्ग्रन्थेषु शाण्डिल्याभिधानभाजोऽनेके महर्षयो दृष्टिगोचरतामायान्ति । (१) पाञ्चरात्रसाहित्ये एकस्य शाण्डिल्यस्य महर्षेर्नाम ग्रन्थकर्तृत्वेन नारदशिष्यत्वेन च बहुशः स्मृतं दृश्यते ।[१] अतोऽयं जयासंहिता-प्रणेता शाण्डिल्यः सूत्रप्रणेतुः शाण्डिल्याद् भिन्न एव (२) बृहदारणकस्य चतुर्था-ध्याये वंशनिरूपके पञ्चमे ब्राह्मणे द्वितीयस्य शाण्डिल्यस्य नाम श्रूयते यो हि वेदत्रयीवेत्ता भक्तिशास्त्रस्याध्येता चास्ति[२] (३) शाण्डिल्यसंहितायां तृतीयो ललितादेव्या महर्षेर्व्यासस्य च शिष्यभूतः संहिताप्रणेता महर्षिः शाण्डिल्यो दृष्टिगोचरो भवति ।[३] (४) बृहदारण्यकस्य षष्ठाध्याये चतुर्थः शाण्डिल्यो वात्स्यत्वेनोल्लिखितो वर्तते । अतोऽयं व्यासशिष्यात् संहिताप्रणेतुश्च शाण्डिल्याद् भिन्न एव गुरोर्नाम्नो भिन्नत्वात् ।[४]

एषु कतमोऽयं महर्षिः सूत्रजातस्य प्रणेता केन सह साम्यं वैषम्यं वा भजते इति वृत्तजिज्ञासायां शाण्डिल्यसंहितायां संहिताकर्तृशाण्डिल्यस्य वंशाध्याय-निरूपितशाण्डिल्याद्भिन्नत्वेन निर्देशाद् वंशाध्यायवर्णितः शाण्डिल्य एव सूत्रप्रणेता महर्षिः शाण्डिल्य इति कल्पयितुं सुशकमिति भक्तिचन्द्रिकाया भूमिकायां निर्णीतवानन्तशास्त्री फडकेमहोदयः,[५] किन्तु बलदेवोपाध्यायमहोदय-स्तत्रैव शाण्डिल्यभक्तिसूत्रस्याध्ययनाधारेण सूत्रप्रणेता महर्षिः शाण्डिल्यः पाञ्चरात्रा-

---

(१) कृतकृत्यो जयत्यस्मिन् शाण्डिल्यः श्रूयते भुवि ।
याहक् प्राप्तं मया पूर्वं परितुष्टाच्च नारदात् ॥ =ज. सं. प. १

(२) कौण्डिन्यात् कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः (बृ. ४।५।)
द्वितीयो वेदशाण्डिल्यो वंशाध्याये निरूपितः ।
येनाधीता त्रयीविद्या भक्तिविद्या ह्यनुत्तमा ॥ =४।६।२७

(३) तृतीयो गार्धभिः प्रोक्तो वीरवैष्णवशासनम् ।
शिष्यः श्रीललितादेव्या व्यासस्य च महात्मनः ॥
संहिता कथिता तेन सारभूतागमाम्बुधेः । =शां ४।१३

(४) वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्यात् ।

(५) द्वि० सं० भू० पृ० ३२; पृ० २१ तथा पृ० ११३ ।

नुयायीति निर्दिशति।[१] अत एव रामानुजाचार्याणां तद्व्याख्याकर्तृत्वं साधु सङ्गच्छते। श्रीरामानुजाचार्या हि जीवानां बहुत्वं भोक्तृत्वमीश्वरस्य चैकत्वं प्रयोजकत्वञ्च वास्तवमिच्छन्त वैषम्यादसिद्धम् (शा० भ० सू० २।१।६) तथा न च क्लिष्टः परःस्यात् (शा० भ० सू० २।१।७) इति सूत्रद्वयमन्यथा योजयन्तीति[२] भक्तिचन्द्रिकायामुल्लेखेन श्रीरामानुजाचार्याणां शाण्डिल्यभक्तिसूत्रे व्याख्याकर्तृत्वं स्फुटमवगम्यते।

शाण्डिल्यभक्तिसूत्रसमयः

एतेन भक्तिसूत्राणां प्राचीनत्वावगमात् तन्निर्माणकालोऽप्यनुमातुं पार्यते। दशमशताब्दीवर्तिनो रामानुजाचार्यात् प्राचीनतरमिदं शाण्डिल्यभक्तिसूत्रमिति निर्विवादम्।

शाण्डिल्यभक्तिसूत्राणि नारदभक्तिसूत्रतः प्राचीनानि सन्ति, यतो हि देवर्षिणा नारदेन भक्तिविषयकमतमतान्तरप्रदर्शनप्रसङ्गे "आत्मरत्यविरोधेनेति शाण्डिल्यः (१८) इत्यत्र महर्षेः शाण्डिल्यस्य नामसङ्कीर्तनं कृतं दृश्यते। एवं श्रीमद्भगवद्गीतायाः श्रीमद्भागवतस्य चाधारे निर्मितत्वाद् भक्तिसूत्राणां ततोऽर्वाचीनत्वं स्पष्टमेव प्रतीयते। श्रीमद्भगवद्गीतातोऽर्वाचीनत्वे 'सैकान्तभावे गीतार्थप्रत्यभिज्ञानात्" (२ २.२८) इति शाण्डिल्य भक्तिसूत्रमेव प्रमाणत्वेनोपस्थापयितुं शक्यते। एवं श्रीमद्भागवतादर्वाचीनत्वे च "परां कृत्वैव सर्वेषां तथा ह्याह" (२.२.२९) इति सूत्रं प्रमाणतया निर्देष्टुं शक्यते। एवञ्च पञ्चमदशमशताब्दीमध्ये एव भक्तिसूत्राणां निर्माणकाल इति निर्णेतुं शक्यः।

मोक्षसाधनविमर्शः

इह हि संसारे सुखमेव मे शाश्वतं स्याद् दुःखलेशमात्रमपि कदाचन मा भूदितिधिया दुःखं परिहातुं सुखञ्चोपलब्धुं सततमभिलषति प्राणिमात्रम्। नहि कोऽपि विवेकी स्वल्पे सुखमनुभवति, सर्वोऽपि जनो निरन्तरमधिकादपि अधिकं सुखमेवाभिवाञ्छति। जीवो यावदनन्तं सुखं न लभते तावत् प्रयतमान एव तिष्ठति। तथाचाह भगवती छान्दोग्यश्रुतिः—यो वै भूमा तत् सुखम्' नाल्पे सुखमस्ति, भूमैव सुखम्, भूमात्वेव विजिज्ञासितव्यः।[३]

एवञ्च भगवत्तत्त्वसाक्षात्कारस्वरूपमेवात्यन्तिकमनन्तं सुखमेव जीवस्य वास्तविकं लक्ष्यं चरममुद्देश्यं मानवशरीरलाभस्य च फलमस्ति। आत्यन्तिकं निरतिशयं नित्यञ्च सुखमेव मोक्षः, मुक्तिः, परमपुरुषार्थः, अपवर्गः, कैवल्यम्,

---

(१) वही पृ० २१। (२) वही पृ० ११३। (३) छा० उ० ७।२२।१।

निर्वाणम्, निःश्रेयसञ्चोच्यते। एतदेव लब्ध्वा जीवः कृतकृत्यो जायते, न तस्य किञ्चिदवाप्तव्यमवशिष्यते। एतदेव सुखस्य चरमा सीमा परमा च गतिरस्ति। तथा चोक्तं भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाम्—

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते।[1]

यद्यपि "अपाम सोमममृता अभूम"[2] इति श्रुत्या सोमपानादिभिर्लभ्यस्य स्वर्गादेरपि सुखसाधनत्वं प्रतीयते तथापि "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" (९।२१) इति गीतावचनानुसारं भोगेन पुण्यक्षयानन्तरं स्वर्गाच्च्युतिदर्शनान्न तदात्यन्तिकं सुखं मन्यन्ते विद्वांसः। वेदान्तसिद्धान्तानुसारमभेदोपासनया निरतिशयानन्दरूपं पूर्णसुखस्वरूपञ्च ब्रह्मसाक्षात्कृत्यैव जीवः सर्वदुःखविनिर्मुक्तो भूत्वा परमानन्दं विन्दते शाश्वतीञ्च शान्ति लभते। पुराणानुसारं तु भेदोपासनया परमात्मनः साक्षात्कारं सम्पाद्य जन्म-मृत्युबन्धनक्लेशरहितो जीवः सगुणस्य भगवतो नित्यलीलाधाम्नि अप्राकृतेन शरीरेण निवसन् भगवत्सान्निध्यसुखमनुभवति। अतो भगवत्स्वरूपसाक्षात्कारमन्तरा न किमप्यन्यदस्ति वास्तविकं सुखम्।

मोक्षस्वरूपविषये तत्साधनविषये च चार्वाकादारभ्य शङ्कराचार्यपर्यन्तं तत्तद्दर्शनकाराणां विद्यते दृढतरो मतभेदः। इत्थं सत्यपि साध्यसाधनविषयेऽनेके मतभेदे सर्वसाधनानां संक्षेपेण संग्रहो भक्तवरमुद्धवमुपदिशता भगवता श्रीकृष्णेनैकस्मिन् श्रीमद्भागवतीये पद्ये कृतोऽस्ति—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कर्हिचित्॥[3]

अत्र ज्ञानपदेन मुक्तिप्राप्तेः साधनभूताः सर्वेऽपि ज्ञानप्रकाराः ससाधना गृह्यन्ते, कर्मपदेन च मोक्षोपलब्धेः कर्मकाण्डान्तर्गताः सन्ध्यावन्दनादिप्रकाराः तथा हठ-राज-मन्त्र-लययोगस्थिताः साधनसहिताः स्वीक्रियन्ते। एवं भक्तिपदेन श्रवण-कीर्तन-स्मरणार्चन-नामग्रहणप्रभृतयः सर्वे गौणमुख्यभक्तिप्रकारा अभिप्रेयन्ते। एवञ्च संक्षेपतो मोक्षार्थं दर्शनभेदेन प्रोक्तानामुपायानां सङ्ग्रहोऽत्र सम्पादित एव प्रतिभाति।

भक्तेः सर्वसुलभत्वं श्रेष्ठत्वञ्च

वस्तुतो मार्गत्रयव्यतिरिक्तो नान्यः कोऽपि पन्था विद्यते, येन स्वीयपरमप्रेमास्पदाच्चिरवियुक्तमित्रात् श्रीमद्भगवतः, अनन्तेभ्यः कालेभ्योऽनन्तासु योनिषु

(१) गीता ६।२२। (२) छा० उ० ५।३।११। (३) ११।२०।१।

संभ्रम्यमाणः जन्ममरणानामवर्णनीयक्लेशपरम्परां सहमानो जीवः पुनरनन्तासीमानन्दमयस्य करुणावरुणालयस्य प्रभोश्चरणसरसीरुहमधिगन्तुमर्हेत् । विशेषतः कलिकालेऽत्राल्पप्राणायुर्मेधसां मानवानां भगवद्भक्तिरेवैकमात्रं सरलं सुगमं सुखसाध्यञ्चावलम्बनमास्ते । अत्र भक्तिमार्गे वर्णाश्रमाधिकारादीनां नास्त्यपेक्षा, बाला वृद्धाः स्त्रियः पुमांसोऽन्त्यजा अप्यधिकृताः सन्ति । सर्वेषां कृते भगवद्भक्तिः सुखाधायिका हितकरी च विद्यते ।

वेदान्तादिसाधनेषु प्रोक्तकठिनसाधनचतुष्टयसम्पत्तिस्तु न सर्वैः प्राप्तुं शक्या, परः सहस्रेषु केनचिदेकेन यथार्थतः साधनचतुष्टयसम्पत्तिद्वारा मुक्तिप्राप्तिः कृता स्यात् । एवं योगद्वारापि त्रिपुटयादिलयपूर्वकासम्प्रज्ञातसमाधिद्वारा परमपदप्राप्तिरपि प्राचीनकाले कैश्चिदपि कृता श्रूयते । अस्मिन् कराले कलिकाले तु क्षीणवीर्याणामल्पशक्तिमतां जीवानां कुटुम्बभरणादिचिन्ताग्रस्तानां दुःखिनां जनानां कृते भगवद्गुणश्रवणादिसाधनं विना नान्य उपायो विद्यते । अत एव श्रीमद्भागवते वैयासकिना शुकेन भक्तिरूपः सुलभ उपायः सर्वसाधनानां कृते सिद्धान्तितः —

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन भजेत पुरुषं परम् ।।[१]

तथा गीतायां भङ्ग्यन्तरेणान्योपायानां कठिनत्वं प्रतिपादितं भगवता श्रीकृष्णेन—

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ।।[२]

अतः सर्वदर्शनोक्तेषु साधनेषु सुलभसाधनरूपभक्तेः संग्रहः केनाप्यंशेन सर्वैः दर्शनकारैः कृत एव । पूज्यपादैर्भगवच्छ्रीशङ्कराचार्यैरपि मोक्षसाधनसामग्र्यां भक्तेरेव गरीयस्त्वं प्रोक्तम्—

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।[३]

देवर्षिर्नारदस्तु भक्त्यैव मुक्तिः सिद्ध्यति न तु तत्र मध्ये ज्ञानादिरूपः कश्चनावान्तरव्यापारोऽपेक्ष्यते इति स्पष्टं प्रतिपादयति—

सा तु कर्मज्ञानयोगेभ्योऽधिकतरा ।[४]

एवं कर्म-ज्ञान-योगापेक्षया भक्तेः श्रेष्ठत्वं प्रतिपाद्य कर्मज्ञानयोगानां सा फलरूपेति प्रोक्तवान् सः —फलरूपत्वात् ।[५]

---

(१) श्रीमद्भागवत २।३।१० । (२) गीता ७।३ । (३) वि० चू० १५ ।
(४) ना० भ० सू० २५ । (५) वही २६ ।

महर्षिः शाण्डिल्योऽपि कर्म-ज्ञान-योगापेक्षया भक्तेः श्रेष्ठत्वं बोधयितुं गीतायाः श्लोकद्वयं भङ्ग्यन्तरेण सूत्रयति—"तदेव कर्मि-ज्ञानि-योगिभ्य आधिक्यं शब्दात्"[1]

गीतास्थं श्लोकद्वयञ्च—

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन ॥
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥[2]

एवं भक्तेः सुलभत्वं भक्तानाञ्च श्रेष्ठत्वं प्रतिपाद्याक्षरविदां कष्टत्वं प्रतिपादितम्—

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥[3]

भक्तिरसायनकारो मधुसूदनसरस्वत्यपि निम्नाङ्कितगीतपद्याधारे भक्तेर्ज्ञानवच्छ्रेष्ठत्वं निर्दिशति । अत एवाद्रुतचित्तस्य निर्वेदपूर्वकं तत्त्वज्ञानं द्रुतचित्तस्य च भगवल्लीलाकथाश्रवणादिश्रद्धापूर्विका भक्तिरित्यवधित्वेन द्वयमभ्युपात्तं वर्तते—

तावत् कर्माणि कुर्वीत नो निर्विद्येत यावता ।
मत्कथा-श्रवणादौ वा श्रद्धा यावन्न जायते ॥[4]

अन्यत्रापि समाधिसुखस्येव भक्तिसुखस्यापि स्वतन्त्रपुरुषार्थत्वात्—भक्तस्य संसारमोक्षस्यावश्यकत्वाद् मोक्षान्तर्गतो वा भक्तियोगः । पुरुषान्तर्गतत्वेन स्वातन्त्र्येण वा भक्तियोगः पुरुषार्थः परमानन्दरूपत्वादिति निर्विवादम् ।[5] इत्यादिना भक्तियोगं परमं पुरुषार्थं निर्णीतवान् यतिवर्यः । अत एव जीवनमुक्तानाममलात्मनामपि ज्ञानिनां भक्तिरावश्यकत्वेनानिवार्याऽभिप्रेता—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥[6]

भक्तेर्वैशिष्ट्यम्

"आत्मेत्येवोपासीत" (बृ० उ० ३.१।४।७) "तदात्मानमेवेत" (कौ०उ, ३.४।२) "तमेव विदित्वाऽतिमृत्युमेति" (श्वे०उ०३।४।१५) इत्यादिश्रौतवचःसमूहचारितार्थ्य-

(१) शा० भ० सू० १।२।२२ । (२) गीता ६, ४६, ४७ । (३) गीता १२।३।५ ।
(४) श्रीमद्भागवत ११।२०।९ । (५) भ० र० पृ० ३२ । (६) श्रीमद्भागवत१।७ १० ।

हेतवे सिद्धान्तितमिदं यत् परस्परसम्बन्धानि वैदिकदर्शनानि मुमुक्षूणां कृते सन्ति दिव्यनेत्रस्वरूपाणि। स्थावरजङ्गमात्मके विशाले जगत्यत्रोच्चावचेषु संख्यातीतेपूद्भिज्जेषु ततश्च स्वेदजेषु तदनन्तरमण्डजेषु ततोऽनु जरायुजेषु शरीरेषु बम्भ्रम्यमाणो जीवः प्रकृतिमातुरनुकम्पया क्रमोन्नतिं लभमानोऽन्ते मानवदेहमाश्रयति—"चतुरशीतिलक्षान्ते मानवः।"[१] एवञ्च चतुरशीतियोनिषु जन्ममरणपरम्परादुःसहदुःखमनुभूयानेकजन्मार्जितपुण्यपुञ्जप्रभावैः मनुष्यशरीरमासादयति जीवलोकः।

कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्।[२]

तदिदमतिदुर्लभं मानवशरीरमवाप्यापि जीवो जन्मजरामरणस्वरूपकठोरदुःखचक्रं परित्यक्तुं न शक्नोति। स च वासनाजालनिगडितो जन्ममृत्युरूपसंसारप्रवाहेऽनवरतं प्रवहति। केवलमुपासनयैवात्मसाक्षात्कारं विधायासौ परमानन्दस्वरूपं मुक्तिपदमधिगन्तुमर्हति। उपासनया योगसाधनेन वा चित्तवृत्तीनां निरोधपूर्वकमन्तःकरणं विघ्नेभ्यः परिरक्षन् साधको भक्तेरमृतमयेन प्रभावेण प्रभावितोऽन्तर्जगति प्रविश्य भगवत्सान्निध्यं लभमान आत्मज्ञानमधिगत्य निर्वाणपदं प्राप्नोति। अपौरुषेयवेदोपासनाकाण्डपरिपुष्टये मुक्तिद्वारमुद्घाट्य निर्वाणस्वरूपं परमानन्दपदमासादयितुं पूज्यपादैर्देवर्षिनारद-महर्षिशाण्डिल्यप्रभृतिभिः महता कौशलेन सर्वकल्याणकारकं सर्वसाधारणं सरलं सुगमं सुबोधं च भक्तिशास्त्रमाविष्कृतम्।

तत्तत्पुराणेषु भगवतो भक्तिर्भक्तान् दुःखबहुलादस्मात् संसारात् परमानन्दपूर्णस्थितौ समुपस्थापयितुमेकमात्रं सर्वसुलभं साधनं निर्दिष्टमस्ति। तत्त्वस्यास्य प्रतिपादनं तु प्रायः प्रतिपुराणं प्राप्यत एव, अथापि पुराणमूर्धन्ये सर्ववेदान्तसारे वैष्णवकुलतिलके श्रीमद्भागवते महापुराणे भक्तितत्त्वस्य सर्वाङ्गीणं विश्लेषणं प्रस्तुतमस्ति। तदनुसारं प्रेमपयोधौ पूर्णात्मनि परमात्मनि संसक्त्या भक्त्या समः कल्याणकारी कश्चनान्यो मार्गो न दृष्टिगोचरतामायाति। तदुक्तं —

न युज्यमानया भक्त्या भगवत्यखिलात्मनि।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये॥[३]

भक्त्या भक्तो यावत् पुलकिताङ्गो द्रवीभूतहृदयो विगलिताश्रुबिन्दुश्च न भवति तावद् आन्तरिकीं पवित्रतां नासादयति। यथा समाधिद्वारा चेतसः

(१) शम्भुगीता पृ० २५। (२) श्रीमद्भागवत ७।५।२२।
(३) श्रीमद्भागवत ३।२५।१९।

समताधिगमाद् मानसिको भावो विषयेभ्यः समूलं दूरीभवति तथैव भगवद्भक्त्या साकं परमानन्दसम्बन्धसत्त्वात् पापराशिः प्रणश्यति। तदनन्तरमग्निना दग्धं निर्मलं सुवर्णमिव जीवः भगवद्भक्त्या गलितमलिनसंस्कारः सन् नैजं स्वाभाविकं स्वरूपमासाद्य शाश्वतीं शान्तिमनुभवति तथा चोक्तम्—

तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः।
निर्दग्धबीजानुशयो महीयसा भक्तिप्रभावेण समेत्यधोक्षजम्॥
अधोक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम्।
तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम्॥[1]

एवं पुराणानुसारं भगवत्तत्त्वप्राप्तये भक्तेर्महत् किमपि साधनं न विद्यते। भक्तितुलनायां धर्मार्थकामानां किमपि मूल्यं नास्ति। यदा भक्तिसाधनद्वारा सर्वोत्तमं परमात्मतत्त्वमपि सर्वतोभावेन साधकस्याधिकारे समागच्छति तदा किं पुनरवशिष्यते। तस्मात्पुराणानां मतेन भक्तिः परमपदप्राप्तये सर्वश्रेष्ठमस्ति साधनम्।

धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता।
समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि॥[2]

अतो भक्त्या भगवतो वास्तविकं स्वरूपं विज्ञाय परमपुरुषार्थं निर्वाणपदं प्राप्तुं शक्यत इत्यत्र नास्ति कश्चन सन्देहलेशः। तथाचोक्तं स्वयमेव भगवता श्रीकृष्णेन—

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥[3]

अत एव सर्वशास्त्रेषु सर्वसम्प्रदायेषु चाविरोधतया भगवद्भक्तेः प्राशस्त्यमुक्तमस्ति। तस्माद्भक्तिः परमतत्त्वप्राप्तये परमं साधनमित्यनवद्यम्।

यथा पदार्थवादिनी न्यायवैशेषिकदर्शने पदार्थज्ञानद्वारा निःश्रेयसपदं प्रदर्शयतः, योगदर्शनञ्च जीवेश्वरयोरेकत्वाधिगमपूर्वकं समाधिना कैवल्यपदं प्रतिपादयति, सांख्यदर्शनं त्रिविधदुःखात्यन्तनिवृत्तिमभिलक्ष्य प्रकृतिपुरुषयोर्विवेकात्मकज्ञानेन मुक्तिमार्गमुपदिशति मीमांसादर्शनमपि वैदिकैः कर्मभिः संस्कारशुद्ध्या निर्वाणोपलब्धिं निर्दिशति, वेदान्तदर्शनञ्चाद्वयज्ञानेन मोक्षाधिगममुद्बोधयति तथैव भगवत्सान्निध्योपलब्धिहेतुभूतं भक्तिदर्शनमपि श्रीमद्भगवत्तत्त्वसाक्षात्कारद्वाराऽपवर्गद्वारमुद्घाट्य परमं पदं प्रापयति भक्तप्रवरान्।

(१) श्रीमद्भागवत ७।७।३६,३७। (२) विं० पु० १।२०।२७। (३) गीता १८।५५।

यथान्तर्बाह्यराज्येऽवस्थितत्वाद् योगदर्शनं निर्विरोधि सर्वहितसाधकमस्ति तथैव कर्मकाण्डज्ञानकाण्डमध्यवर्ति भक्तिदर्शनमपि सर्वाविरुद्धमखिलहितसाधकञ्च विद्यते। किमपि दर्शनशास्त्रं स्वकीयज्ञानभूमेरनुरोधतोऽन्यदर्शनमतं यदि खण्डयति तर्हि हानिकारकं नास्ति। यथा समतलभूमिपर्यटनपरायणः पथिको यदि पर्वतप्रदेशभ्रमणशीलक्रियाकौशलं निन्दन् समतलभूभ्रमणकौशलमेव प्रशंसति यद्वा पर्वतमार्गविचरणशीलः पथिकः स्वीयं भ्रमणकौशलं बहु मन्यमानः समतलभूमिभ्रमणपरायणं मानवं निन्दति तदानीं न कापि हानिः, प्रत्युत देशकालयात्रानुसारेण तदुपकारकमेव तथैव यद्येकं दर्शनविज्ञानं दर्शनान्तरमतस्य कुत्रचित् सिद्धान्ते दोषमारोपयति सिद्धान्तं वा खण्डयति तदा नैतद्दोषायावधेयम्। यत्र दर्शने यस्या ज्ञानभूमेरधिगतये यद्धि विज्ञानं विवक्षितं तत्र तस्यैव प्रौढिः सम्पादिता भवति। अतस्तत्खण्डनं न दोषाधायकम्। भक्तिदर्शने न कापि खण्डनप्रणाली क्वचिदप्यवलम्बितास्ति। अत एतस्य सार्वभौमदृष्टिः सर्वथा सर्वाभ्यर्हिता मान्या समादरणीयाऽनुष्ठेया च वर्तते।

यथा कर्ममीमांसादर्शनाश्रयणमन्तरेण विचित्रविशालदुरुहकर्मरहस्यं न हृदयङ्गमं कर्तुं शक्यते तथैव भक्तिशास्त्रानुसारं भक्तिदर्शनस्य विज्ञानमपि हृदयङ्गमं विधातुमसमर्थस्य कस्याप्युपासकस्य न साफल्यप्राप्तिः सम्भवति। अत एव कर्ममीमांसादर्शनं यथा सकलशाखिनां सर्वसाम्प्रदायिकानां च कल्पसूत्रभूतं परमं सहायकं वा वर्तते तथैव भक्तिदर्शनमपि सर्वविधोपासकानां निखिलसाम्प्रदायिकानाञ्च परमाश्रयस्वरूपं विद्यते।

भक्ति-ज्ञान-कर्मवादः

भारतीयधार्मिकदार्शनिकक्षेत्रे त्रिपथगाया गङ्गाया धारावद् भक्ति-ज्ञान-कर्मणां तिस्रः चिन्तनधाराः चिरकालतः प्रवलन्त्यो दृश्यन्ते। मानवानां विकासपथे उपस्थितान् विघ्नान् निराकर्तुं लोककल्याणकामनया भारतीयमनीषिभिः त्रयाणां भक्ति-ज्ञान-कर्मणां विचारः साधनरूपतया समुपस्थापितः। त्रयाणामेषामस्ति अन्योऽन्यसम्बन्धः।

वैदिकसंहितासु एकेश्वरवादेन सह भक्तिमार्गस्य प्राधान्यमुपलभ्यते। वैदिककालीना भक्तिः ब्राह्मणकाले कर्मकाण्डरूपेण अभिव्यक्ता। कर्मकाण्डमपि उपनिषत्काले बहिर्मुखीं प्रवृत्तिं परित्यज्य अन्तर्मुखीं प्रकृतिमवलम्ब्य ज्ञानरूपेण परिणतम्। आरण्यकसाहित्येन बाह्यं कर्मकाण्डं मानसव्यापारसाध्यं विधाय ज्ञानस्य मार्गः प्रशस्तीकृतः। यत्परिणामे विशुद्धज्ञानप्रधानमुपनिषत्साहित्यं ज्ञानस्य डिण्डिमघोषमुदघोषयत्।

एवं वैदिकवाङ्मयकाले भक्तेः, ब्राह्मणकाले कर्मकाण्डस्य, उपनिषत्काले च ज्ञानस्य प्राधान्यं विलोक्यते। पुनः पुराणकाले च भक्तेरेव प्रामुख्यं जातम्। एवं त्रिभिरेभिः साधनैर्यथाधिकारं मानवो मोक्षमवाप्य शाश्वतीं शान्तिमुपलभते।

वैदिकं काण्डत्रयमनुसृत्य मीमांसात्रयमपि परस्परघनिष्ठसम्बन्धसंयुक्तं विद्यते। मीमांसात्रयज्ञानभूमयोऽपि परस्परनैकट्यभावोपेताः सन्ति। एवं सत्यपि तेषां पुरुषार्थेषु महानस्ति मतभेदः। तद् यथा कर्ममीमांसादर्शनं कर्मकलापं ब्रह्ममीमांसा-परनामकं वेदान्तदर्शनं ज्ञानं, भक्तिदर्शनञ्च भक्तिमेव मुक्तिकारणमामनन्ति। इत्थञ्च विभिन्नज्ञानभूमिविज्ञानानुसारेण पुरुषार्थभेदानाकलय्योपासकैर्विचलितैर्न-भाव्यम्, यतोऽन्नमयकोषपोषणविषये शारीरिकयन्त्रेषु मुखस्य प्राधान्यं प्रतिपाद-यताम्, पाकस्थाल्याः प्रामुख्यं निरूपयताम्, हृदययन्त्रस्य वा वैशिष्ट्यं वदतां त्रिविधानां मानवानां विचाराः सत्यतामावहन्ति, यतो ह्यन्नं मुखेन पाकस्थाली-मुपढौकते, ततो रसतामापन्नं हृदययन्त्रमाश्रित्य रुधिरं सत् सर्वशरीरे सञ्चरति, शरीरस्य रक्षां पुष्टिञ्च विदधाति। एकत्र प्रविष्टमन्नमन्यत्र गत्वा स्वीयं समुचितं कार्यं सम्पादयति। अतो यन्त्रत्रयप्रशंसनं कुर्वतां त्रिविधानां पुंसां वचांसि यथा न सन्त्यसत्यानि तथैव कर्म-ज्ञान-भक्तियोगा अपि परस्पराश्रयसम्बन्धनिबन्धनाः सन्ति। सुतरामेतादृशे मतभेदे सत्यपि लक्ष्यहानिसम्भावना नास्ति। ज्ञानयोगिनः कर्मयोगिनो भक्तियोगिनश्चान्योऽन्यं पूर्णाधिकारमासाद्य कृतकृत्यतामापद्यन्ते, ब्रह्मसायुज्यञ्च लभन्ते। अतो दर्शनशास्त्रेषु पारस्परिकं मतभेदमवलोकयतां सन्देहा-वसरो नास्ति। यथा सौधनिर्माणायेष्टिका-जल-चूर्णानां समानभावेनास्ति उपयोगः एकस्याप्यभावे सौधनिर्माणमसम्भवं तथैव निःश्रेयसाधिगमाय कर्मोपासना-ज्ञानानां त्रयाणामप्यावश्यकता विद्यते, अतो भगवद्वाक्यस्वरूपो वेदः कर्मो-पासनाज्ञानकाण्डैस्त्रिधा विभक्तो विद्यते। वेदस्य काण्डत्रयमनुसृत्य मीमांसादर्शन-त्रयी अपि स्वतः सिद्धा भवति।

ऋते ज्ञानान्न मुक्तिः, ज्ञानादेव तु कैवल्यम्, नहि ज्ञानेन सदृशं पवित्रमिह विद्यते इत्यादिसिद्धान्तानुसारं मोक्षोपलब्धिसाधनस्य ज्ञानस्यापि साधकोऽन्ते सर्वात्मनात्मानं श्रीभगवते समर्पयति। एवमिदं समर्पणमपि शरणागतिः भक्तिरेव। अस्या भक्तेः प्राप्तये उभे अपि ज्ञानकर्मणी साधने भवतः। तथाच भक्तिः भगवता सहात्मनः साक्षात् सम्बन्धं स्थापयति। अतो ज्ञानकर्मणोर्द्वयोरुपरि भक्तेः स्थानं सिद्धयति।

ज्ञान-कर्म-भक्तीनां मार्गेऽग्रेसरन् साधकः आत्मनोऽभीष्टां सिद्धिं लभते। कियन्त आचार्या एषु कस्याप्येकस्य पूर्णतया स्वाभिलषितां सिद्धिं मन्यन्ते।

वस्तुतः त्रयाणामेषां भक्तिज्ञानकर्मणां समन्वयद्वारा सम्यक् सिद्धिप्राप्तिः प्रशस्ता प्रोच्यते। एषां त्रयाणां समन्वयः पूततमः त्रिवेणीसङ्गम इव जीवं परमात्मानमुपस्थाप्य संसारसागराद् विमोचयति। अतो मानवजीवनस्य साफल्याय मनुष्ययोनिजन्मलाभस्य च चरमलक्ष्यमोक्षोपलब्धये त्रयाणामप्येषामनुष्ठानमत्यावश्यकम्। त्रिषु एषु एकस्य कस्यापि अभाव इष्टसिद्धेः गतिप्रतिरोधकः। अत एवैषां समन्वयमार्ग एव सर्वेषां श्रेयस्कर इति मुख्यो वैदिकः सिद्धान्तः।

एतद्विषये पूर्वं महान् संघर्षः प्रचलन्नासीत्। दर्शनेषु मीमांसादर्शनं मुख्यतया कर्मकाण्डस्य समर्थकमासीत्। वेदान्तदर्शनं च प्रधानतया ज्ञानमार्गस्य प्रतिपादकं बभूव। मीमांसकाः कर्म साक्षाद् मुक्तिसाधकं मत्वा ज्ञानं तदङ्गं मन्यन्ते। वेदान्तिनश्च ज्ञानमेव मोक्षस्य मुख्यं साधनं मत्वा कर्म केवलं बुद्धिशुद्धिप्रयोजकं गौणं साधनं स्वीकुर्वन्तिस्म। एवं कुमारिलभट्टः कर्ममार्गस्य प्रमुख आचार्यः, श्रीशङ्कराचार्यश्च ज्ञानमार्गस्य प्रवर्तक आचार्यः, देवर्षिनारद-महर्षि-शाण्डिल्यादयश्च भक्तेः प्रतिष्ठापकाचार्या बभूवुः।

त्रिषु एषु ज्ञानमार्गः कृपाणधारासमः तीक्ष्णोऽतिदुर्गमश्चेति न सर्वैः तत्र गन्तुं शक्यते, कर्म तु ऐहिकजीवनस्य सुखसामग्र्या स्वर्णिमस्वप्नदर्शने सक्तं सत् त्यागवैराग्ययोः उच्चतमाया भूमेः स्पर्शमकुर्वाणं नानन्दानुभूतिसमर्थं जायते, तस्य कष्टसाध्यत्वात्। परिशेष्याद्भक्तिमार्ग एव सर्वसाधारणः सुलभः सुगमश्चास्ति। यत्र भक्तवत्सलस्य भगवतोऽनुकम्पया शरणागतो भक्तोऽनायासेन संसारसागरा दुस्तर्तुं समर्थो भवति।

अत एव महामुनिना कपिलेन स्वमातरं देवहूतिं प्रति श्रीमद्भागवते भक्तेर्महिमानं वर्णयता सा ज्ञानकर्मणोरपेक्षया श्रेष्ठ प्रतिपादिता। देवर्षिणा नारदेनापि ज्ञानवैराग्ययोः भक्तेः सन्तानत्वं समर्थयता व्रततपोयज्ञादिभ्यो भक्तिः श्रेयसी कथिता। स्वयं भगवता श्रीकृष्णेनापि उद्धवं प्रतिबोधयता भक्तिमतो न ज्ञानं न वा वैराग्यं कल्याणाय प्रभवति, किन्तु मम प्राप्तेः सुलभः पन्था भक्तिरेवास्तीति सिद्धान्तितम्—

नारदभक्तिसूत्रे शाण्डिल्यभक्तिसूत्रे च श्रीमद्भागवतानुसारमेव ज्ञान-कर्म-योगेभ्यो भक्तिः श्रेयसी अभिमता, भगवत्कृपा-महत्कृपयोरेकः कणोऽपि भक्तेः परमं साधनं वर्णितम्।

साधकः प्रभुपादपद्मोपस्थितये येषां साधनानामवलम्बनं करोति तेषु एषां भक्ति-ज्ञान-कर्मणां त्रयाणां सामञ्जस्यमस्ति, नतु भक्त्या ज्ञानकर्मणी तिरस्क्रियेते योग-याग-जप-तपोव्रतादीनां तत्र मान्यतास्ति। त्रयाणमेषां परस्परं साहाय्या-

पेक्षितत्वाद् योगदर्शने भगवता पतञ्जलिना यमनियमादिषु अन्तर्भाव्य ज्ञानकर्म-भक्तीनां तत्र स्थानं प्रदत्तम् ।

परमार्थत एषु एकोऽन्यतमस्य पूरको भूत्वा पारस्परिकसहयोगद्वारा साधकं प्रकाशपुञ्जं सुधासिन्धुमानन्दागारं भगवन्तमुपस्थापयति ।

ज्ञानकर्मणोः पर्यवसानं भक्तावेव भवति । विकासक्रमे ज्ञानकर्मणोरूर्ध्वं भक्तिः विराजते । उभे अपि ज्ञानकर्मणी भक्त्युपलब्धये समाने स्तः साधने । प्रभुपादपद्मप्राप्तये भक्तिः स्वयं साधनरूपास्ति । भक्तो यदा साधने एव रसमनुभवति तदा तत्फलात् स उदासीनो जायते तदा तदेव साधनं साध्यं भवति । भक्तिर्हि साधकानां कृते प्रभुपादपद्मप्राप्तये मधुरं फलं प्रदत्ते । साधकः स्वाध्यायादुत्पन्नस्य सदाचारस्य सौन्दर्यस्य मननस्य निदिध्यासनस्य च अन्तिमं लक्ष्य-केन्द्रं भगवन्तमेव मन्यमानःपरोपकारकार्येषु कलाकारकृतिषु दर्शनचिन्तनेषु आदर्श-बलिदानेषु देशभक्तौ समाजसेवायाञ्च प्रभुरूपमेव पश्यन् तदुपासको भवति ।

एकनिष्ठया कृता भगवद्भक्तिः चाण्डालमपि पुनाति गद्गदया वाण्या द्रवित-चित्तः जातवेपथुः सरोमोद्गमो भक्तः कदाचिद् रुदन् कदाचित् हसन् कदाचिल्लज्ज-मानः कदचिच्च नृत्यन् समस्तं विश्वं पवित्रयति । यथाग्निना ध्मातं सुवर्णं स्वकीयं-मलं विधूय निर्मलं सत् स्वं रूपं प्राप्नोति तथैव भक्त्या स्वकं कर्मविपाकमपहाय भगवन्तमेव प्राप्नोति । भगवच्चरित्रलीलादीनां श्रवणकीर्तनादिना विशुद्धात्मा भक्तोऽञ्जनाञ्जितं चक्षुरिव सूक्ष्मं परमात्मतत्त्वं पश्यति । तस्माद् भगवत्प्राप्तौ भक्तिरेवैक-मात्रं सुलभं साधनमित्यत्र नास्ति विवादः ।

भक्तिग्रन्थेषु श्रीमद्भागवते च प्रतिपादिताया भक्तेः ज्ञानकर्मणोः अवरत्व-प्रतिपादनं युगमान्यताभिव्यक्तिमात्रं प्रतीयते । अतः त्रयाणामेषां परस्परं पूरकत्व-स्वीकार एव श्रेयान् मार्गोऽस्ति । ज्ञानं लक्ष्यं बोधयति, कर्म लक्ष्यपर्यन्तमुप-स्थापयति, भक्तिश्च भक्तं लक्ष्ये लीनं करोति । अपि च ज्ञानं भक्तिकर्मणी द्वे अपि प्रदीप्ते करोति, भक्तिः ज्ञानकर्मणोः उद्रेकं विधत्ते, कर्म च द्वयोः निष्पादने साहाय्यं ददाति । अतः त्रयाणमेषां न क्रमपरत्वं प्रत्युत लक्ष्यप्राप्तये सह समन्वीतिः अनिवार्या स्वीकृतास्ति ।

बहूनामाचार्याणां मतेन ज्ञान-कर्म-भक्तीनामस्ति अन्योऽन्यसम्बन्धः । भक्तिः ज्ञानादुत्पद्यते भक्तेश्च ज्ञानमुपजायते । वल्लभाचार्येण ब्रह्मसूत्रस्याणुभाष्ये (३।३। २९) ज्ञानमार्गो भक्तिमार्गश्च भिन्नो भिन्नोऽभिमतः । तन्मते उभयोः फलमपि पृथक् पृथक् अस्ति । ज्ञानमार्गस्य फलं केवलमक्षरब्रह्मणः स्वरूपज्ञानं ततश्च मोक्ष,:

परन्तु भक्तेः फलं पुरुषोत्तमे प्रवेशः। भक्तिमार्गो ज्ञाननिरपेक्षकः, परन्तु प्रेमभक्त्या समुत्पन्नं पुरुषोत्तमस्य ज्ञानं तल्लीलाप्रवेशस्यास्ति साधकम्। प्रत्येकं युगं कतिपयान् स्वीयान् सिद्धान्तानादायैवाग्रे प्रवर्तन्ते ये तद्युगीनां चिन्तापद्धतिमाचारप्रणालिञ्च प्रभावयन्ति। ब्राह्मणग्रन्थैः विशेषतया कर्मकाण्डस्य उपनिषद्भिः ज्ञानकाण्डस्य पाञ्चरात्रैः पुराणैश्च भक्तेरेव प्राधान्यमभिमतम्। अतो युगानुसारं तेषां त्रयाणामपि प्राधान्यस्वीकारात् सर्वं समञ्जसं भवितुमर्हति।

नहि भाववद् भक्तिः स्वत उत्पद्यते, किन्तु तदुत्पादनाय साधनमप्यपेक्ष्यते। तदुक्तं श्रीमद्भागवते—

तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्।

साधनमन्तरापि यदा कदा प्राक्तनसंस्काराणां प्रभावेण क्वचिद् भक्तिर्जन्मजातापि संभवति, किन्तु तत्प्राचुर्यं तु साधनाजन्यमेव भवति। साधनस्य येन क्रमेण भक्तेरुदयो भवति तस्य निर्देशः निम्नाङ्कितयोः पद्ययोः रूपगोस्वामिना भक्तिरसामृतसिन्धौ कृतो वर्तते—

आदौ श्रद्धा ततः साधुसङ्गमो भजनक्रिया।
ततोऽनर्थनिवृत्तिः स्यात्ततो निष्ठा रुचिस्तथा॥
अथासक्तिः ततो भावस्ततः प्रेमाभ्युदाञ्चति।
साधकानामयं प्रेम्णः प्रादुर्भावे भवेत् क्रमः॥[1]

अत्र निष्ठापर्यन्तं साधनावस्था, रुचिः आसक्तिश्च मध्यवर्तिन्यौ अवस्थे, ततो भाव उद्भवति तदनन्तरं प्रेम प्रजायते। अत्र भाव एव रतिरुच्यते, प्रेम च भक्तिरभिप्रेतास्ति।

अस्यैव क्रमिकविकासस्य विवेचनं श्रीमधुसूदनसरस्वतीस्वामिपादैरपि चतुर्षु भागेषु कृतं विद्यते—कर्मयोगः, अष्टाङ्गयोगः, ज्ञानयोगः, भक्तियोगश्च। यत्तु श्रीमद्भागवते नृणां कल्याणाय योगत्रयस्यैव वर्णनमुपलभ्यते। तत्राष्टाङ्गयोगे कर्मयोगस्य एव सन्निवेशः क्रियते। यद्यपि शृङ्गग्राहिकयाऽष्टाङ्गयोगस्तत्र नोक्तः तथापि ज्ञानान्तर्गतत्वेनोक्तप्राय एव। वस्तुतस्तु व्यञ्जनलवणन्यायेनानुक्तोऽपि स नान्तरीयकतयाऽवगम्यत एव।

कर्मयोगः शास्त्रविहितो वर्णाश्रमधर्म एव कथ्यते यत्र भगवत्परिचर्याविषयकं कर्मापि संनिविश्यते। भक्तिशास्त्रीयपरिभाषायामयं कर्मयोगो वैधी भक्तिः भण्यते। कर्मयोगस्य फलमस्ति अन्तःकरणस्य शुद्धिः। अस्यानुष्ठानं तावदेव

(१) पूर्वविभागे ४।६.७।

विधेयं यावदन्तःकरणं शुद्धिसम्पन्नं न भवेत् । अन्तःकरणशुद्धया हृदयं भगवद्वासनावासितं जायते । ततो भगवत्कथाश्रवणादिना चित्तस्य द्रवत्वात् सहसा भक्तिरुदेति । ज्ञानयोगस्यापि अन्तिमं लक्ष्यं भक्तियोग एवास्ति । यदि ततो भक्तियोगो नोदीयात् तर्हि ज्ञानयोगो व्यर्थः । श्रीमद्भागवतोक्तवचनानुसारं सांख्योक्तानां पञ्चविंशतितत्त्वानामनुलोमक्रमेण जगदुत्पत्तिचिन्तनं प्रतिलोमक्रमेण च प्रलयचिन्तनं तावदेव कर्तव्यं यावत् मनो निर्लिप्तं सत् भक्तियोग्यं न भवेत् । तत्त्वानां चिन्तनेन यदा मनो निर्विषयं भवति तदा तस्य दौरात्म्यं स्वत एव तिरोहितं भवति—

निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः ।
मनस्त्यजति दौरात्म्यं चिन्तितस्यानुचिन्तया ॥[1]

भक्तियोगेन निरन्तरं भगवन्तं भजतां भक्तानां हृदयेषु प्रविश्य भगवान् तद्गताः सर्वा वासनाः समूलमुन्मूलयति । एवञ्च कर्मयोगस्येव ज्ञानयोगस्यापि अन्तिमं लक्ष्यं भक्तियोग एव । यत्तु क्वचिद् भक्तियोगः ज्ञानस्य साधनमप्युक्तं तस्यायमाशयः—यद्यपि साधनभक्तिः ज्ञानयोगस्य भवति कारणं, किन्तु प्रेमभक्तिस्तु ज्ञानयोगादेवोद्भवति । श्रीमद्भागवते स्पष्टमुक्तमस्ति यद् भक्तस्य वास्तविकं श्रेयः न ज्ञानेन भवति न वा वैराग्येण । कर्मज्ञान-वैराग्यदान-धर्मादिभिर्यत्फलमवाप्यते तत्सर्वं भगवद्भक्तो भक्तिमहिम्नैव प्राप्नोति । ऐकान्तिको भगवद्भक्तो न किमपि वाञ्छति तद्भक्तया भगवता दीयमानां मुक्तिमपि न स्वीकरोति, किन्तु स निरन्तरमनन्येन मनसा चिन्त्यमानां भक्तिमेव कामयते । अतो भक्तियोग एव श्रेयान् सर्वसुलभश्चेति निश्चप्रचम्—

विद्यातपःप्राणनिरोधमैत्री-तीर्थाभिषेक - व्रतदानजप्यैः ।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते ॥[2]

यत्र ज्ञानकर्मणोः द्विजातिमात्रस्यास्त्यधिकारः तत्र भक्तौ मानवमात्रस्याधिकार उद्घोषितः पुराणेषु । भक्तौ मानवमात्रस्याधिकारं विवृण्वता महर्षिणा वसिष्ठेन पद्मपुराणे प्रोक्तं यत् यथा हरिभक्तौ मनुष्यमात्रस्यास्ति अधिकारः तथैव माघस्नाने स्वाभाविकः सर्वस्याधिकारो वर्तते—

सर्वेऽधिकारिणो ह्यत्र हरिभक्तौ यथा नृप ![3]

यथा स्वकर्तव्यपालनं गुणः तथैव तदुल्लङ्घनमपि दोषः । भक्तिमार्गानुयायिनां भक्तिमार्गस्य पालनं गुणः तद्विपरीताचारणं दोषो निगद्यते । अत एवोक्तम् ।

---

(१) श्रीमद्भागवत ११।२०।२३ । (२) श्रीमद्भागवत १२।३।४८ । (३) स्वर्गखण्ड २०।२१ ।

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजत्यपक्वोऽथ पतेत्ततो यदि ।
यत्र क्वाऽभद्रमभूदमुष्य किं को वार्थ आप्तो भजतां स्वधर्मतः ।[१]

भक्तेः साध्यसाधनोभयत्वविवेचनम् ।

भक्तिः साध्यरूपा साधनरूपा चास्ति । यथा प्रसादमधिरोढुमिच्छुना मानवेन अन्तिमस्य सोपानस्य प्राप्तये प्राथमिकानि सोपानानि पारयितव्यानि भवन्ति तथैव प्रभुपादपद्मं प्राप्तुमिच्छुना साधकेन साध्यरूपां भक्तिं प्राप्तुं भक्तेः अङ्गानि अनुष्ठेयान्येव भवन्ति ।

नारदभक्तिसूत्रानुसारं सनकादयो मुक्तेः फलं भक्तिमेव मन्यन्ते । यतो हि तन्मते भक्तिः स्वयमेवास्ति फलम्—"स्वयं फलरूपेति ब्रह्मकुमाराः" (३०) भगवत्सेवार्थं मोक्षमपि उपेक्षमाणा निर्गुणा भक्ता भगवद्भक्तिमेव स्वकीयं परमं पुरुषार्थं मन्यन्ते । भक्तेरियं साध्यावस्थास्ति । भक्तावस्थां भक्ता गुणत्रयमतिक्रम्य भगवद्भावमुपढौकते । एवंभूता भक्ता नारदेन एकान्तिनः सर्वश्रेष्ठाश्च प्रोक्ताः "भक्ता एकान्तिनो मुख्या" (६७) गीतायां यत्र भगवता श्रीकृष्णेन नैस्त्रैगुण्याय भक्तप्रवरः पार्थः प्रोक्तः तत्र तस्यायमभिप्रायो यत् अस्या एव साध्यरूपाया भक्तेः प्राप्तिरवश्यं विधेया ।

अत एव भक्तिः साधनसाध्योभयरूपा सिध्यति । तत्र साध्यावस्थायां ज्ञानकर्मयोगादीनि भक्तेः साधनानि साधनरूपेण च भक्तेः साध्यः परमानन्दस्वरूपः परमात्मैव । भक्ताचार्यैः भक्तिं साध्यां मत्वैव प्रेमसातत्यस्य प्राधान्यं प्रदत्तम् । देवर्षिणा नारदेन परमप्रेमरूपा भक्तिः स्वीकृता, शाण्डिल्येन महर्षिणा तु ईश्वरे पराकाष्ठा या अनुरक्तिः सैव भक्तिः प्रोक्ता ।

भगवानस्ति प्रेमस्वरूपः । यथा समुद्रजलं बाष्प-मेघादिरूपेण परिणतं सत् पुनः वर्षा-नद-नदी-द्वारा समुद्रमेवोपगच्छति तथैव प्रेमप्रभवस्य भगवतः प्रेमधारा निःसृत्य भक्तहृदयं सिञ्चन्ती पुनः प्रेमस्रोतःस्वरूपे परमात्माभिमुखं व्रजन्ती तत्रैव निलीयते ।

भारतीयप्रेमपद्धतौ प्रेम अनेकेषु रूपेषु अभिव्यक्तं भवति—मित्रयोः परस्परं प्रेम, पतिपत्न्योरन्योऽन्यं प्रेम, पितापुत्रयोरितरेतराश्रयं प्रेम । यथा प्रेमप्रेरितः पित्रादिः स्वसन्ततिं पालयति पोषयति तथैवेश्वरोऽपि भक्तप्रेमाभिभूतो भक्तान् पालयति तेषां हितं विधत्ते, निरन्तरञ्च तदर्थं चिन्तयति ।

यथा मेघात् पर्वतीयोच्चावचप्रदेशेषु विसृष्टं वर्षाजलं शिलाखण्डैः संघट्टमानमितस्ततो निपतत् प्रपनच्च यावत् समतलभूमौ नोपतिष्ठते तावत् निर्मलं स्थिरं

(१) श्रीमद्भागवत १।५।१७ ।

च न भवति तथैव जीवोऽपि प्रभुतः पृथग् भूत्वा विभिन्नासु योनिषु वम्भ्रम्यमाणोऽनेकान् क्लेशान् सहमानो विविधांश्च यातनामनुभवन् यावत् प्रभुपादपद्मं नोपतिष्ठते तावत्तस्य पापतापयोः शान्तिर्न जायते। अतो जीव आनन्दधामानं परमात्मानमुपस्थायैव आनन्दमनुभवितुमर्हति नान्यथा। अतो भगवत्प्राप्तये भक्तिररित अति सरलो मार्गः।

यद्यपि वैष्णवसम्प्रदायानुसारं श्रीमद्भागवतं श्रीमद्भगवद्गीतेति ग्रन्थद्वयं प्रधानमस्ति। यत्र भक्तिज्ञानकर्मणां समन्वितिरूपेण दर्शनं वोभवीति तथापि ज्ञानकर्मभ्यां भिन्ना भक्तेरेका स्वतन्त्रा सत्ता स्थिरा कृतास्ति, यत्र नारदभक्तिसूत्र-शाण्डिल्यभक्तिसूत्रसिद्धा भक्तिः अप्यन्तर्भवति। गीतायामयं ध्वनिः श्रोत्राध्वनीनो भवति यत् ज्ञानद्वारा मोक्षस्य सम्भवेऽपि ज्ञानप्राप्तिर्भक्तिद्वारैव शक्या। भगवता श्रीकृष्णेन स्वयं प्रोक्तमस्ति यद् यः साधको भक्त्या मां तत्त्वतो ज्ञात्वा ज्ञानाय प्रयतते स मां साधु जानाति। अत एव भक्तिः साध्या। भक्तेः प्रत्येकावस्था परस्परापेक्षास्ति। प्रत्येकं प्राथमिकसोपानारोहणमन्तिमसोपानप्राप्ति साधनमस्ति, अन्तिमसोपानप्राप्तिश्च पूर्वेषां साध्यास्तीत्यतो भक्तेरुभयरूपता युक्तियुक्तैव। नारदेन भक्ताचार्याणां मान्यतानुसारं भक्तेः साध्यसाधनरूपताविवेचनं कृतम्। भक्तानां सर्वस्वं भक्तिरेव। अतो नारदेनेयं फलरूपा प्रोक्ता। साधनरूपाया भक्तेरपि लक्ष्यं भक्तेः परावस्था। अहैतुकी भक्तिः लक्ष्यलक्षणरूपत्वात् फलरूपा सिध्यति, तदर्थं फलान्तरकल्पनानुपादेया।

श्रीमता वल्लभाचार्येण भक्तिज्ञानयोः पार्थक्यं स्वीकृत्य तयोः परिणामेऽपि पार्थक्यमङ्गीकृतम्। तदनुसारं ज्ञानमार्गस्य फलं ब्रह्मज्ञानं तद्द्वारा च मोक्षावाप्तिः। भक्तिमार्गस्य फलं तु पुरुषोत्तमतत्त्वस्याधिगमः। एतेन ज्ञानपेक्षया भक्तिमार्गः सरलो राजमार्गः। साध्यप्राप्तौ साधकः तत्साधनाद्विरमति। साधनौदासिन्यात् कालान्तरे साध्यरूपफलादपि कदाचिद् विरतिः सम्भवति। वैधीरागानुगे द्वे अपि भक्ती ऐकान्तिकभक्तेः साधने स्तः। नारदानुसारमियमेव पराभक्तिः यत्रोपस्थाय भक्तशिरोमणिर्मानवमणिः प्रभुभावे एवं तल्लीनो भवति येन निरन्तरं तं पश्यन् नान्यत् किञ्चिदवगच्छति।

भक्तिस्तावद् द्विविधा फलरूपा साधनरूपा च। तत्र भजनं भक्तिरिति भावव्युत्पत्त्या भक्तिशब्देन फलमभिधीयते तस्य च निरतिशयपुमर्थत्वात्। भज्यते सेव्यत भगवदाकारमन्तःकरणं क्रियतेऽनयेति करणव्युत्पत्त्या भक्तिशब्देन श्रवणादिसाधनमभिधीयते।

यथा विज्ञप्तिर्विज्ञानमिति भावव्युत्पत्त्या बृहदारण्यके—विज्ञानमानन्दो ब्रह्म (३।९।२८) इत्यत्र विज्ञानशब्दो ब्रह्मणि वर्तते। विज्ञायतेऽनेनेति करणव्युत्पत्त्या तैत्तिरीयोपनिषदि—विज्ञानं यज्ञं तनुते (२।५।१) इत्यत्र विज्ञानशब्दश्च करण-व्युत्पत्त्या अन्तःकरणे प्रयुज्यते तथैव

स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम्।
भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम्॥ (११।३)

इतिश्रीमद्भागवतीयप्रबुद्धस्य वाक्ये प्रथमभक्तिशब्दः करणव्युत्पत्त्या भागवत-धर्मेषु प्रयुक्तो द्वितीयस्तु भावव्युत्पत्त्या फले निगदितोऽस्ति। तस्मात् साधनफल-भेदेन भक्तेर्द्वैविध्योपपत्तौ न कापि बाधा।

भक्तिचन्द्रिकायां नारायणतीर्थेन भक्तिर्न सेवामात्रं समानेऽपि राजसेवाकर्मणि अयं भक्तः, अयमभक्त इति भेदव्यपदेशदर्शनात्। तस्माद्भक्तिर्भावविशेष इति प्रोक्तम्। एतत्सर्वमभिप्रेत्यैव महर्षिणा शाण्डिल्येन "सा परानुरक्तिरीश्वरे" (२) इति भक्तिलक्षणं कृतम्।

उपसंहारः

देवर्षिणा नारदेन महर्षिणा शाण्डिल्येन च स्वस्मिन् स्वस्मिन् सूत्रे गोपीनां भक्तिः आदर्शभक्तिः स्वीकृतास्ति—यथा व्रजगोपिकानाम् (नारदभक्तिसूत्रे २१) अत एव तदभावाद् वल्लवीनाम् (शाण्डिल्यभक्तिसूत्रे १।२।५) वस्तुतो गोपी-नामादर्शप्रेम्णः तुलना विश्वप्रेमपरम्परायां भवितुं नार्हति। साधनायां प्रेममात्रा यावती अधिकतरा भवति तावत्येव श्रेष्ठमा भक्तिर्भवति। गोपिकानां प्रेम्णः केन्द्रबिन्दुः षोडशकलः पुरुषः साक्षाद् भगवान् श्रीकृष्ण एवासीद् यस्मिन् ताभिः सकलाः शारीरिक्यः चेष्टा मानसा व्यापाराः सर्वविधानि सुखानि दुःखानि च समर्पितान्यासन्। क्षणमात्रमपि श्रीकृष्णविरहे तासां जीवनं जलविहीनमीन इव व्याकुलमासीत् केवलं पुनर्मिलनलालसायामेव ताभिः प्राणधारणं कृतम्। इदमेवास्ति विशुद्धस्य प्रेम्णः सत्यं स्वरूपं यतो हि तत्र न लौकिकरागजन्य-बन्धनस्य वासनाया वा सत्ता तिष्ठति। अत एव भक्तिसम्प्रदाये विशुद्धस्य प्रेम्णोऽपूर्वं स्थानमङ्गीकृतमस्ति। विशुद्धं प्रेमैव भक्तिभूमिकाया आधारः स्तम्भः प्रोच्यते। समस्तानि साधनानि इदमेव लक्ष्यीकृत्यैव भक्तेरैकान्तिकव्यवस्थापर्यन्त-मुपस्थापयितुं मार्गं प्रशस्तं कुर्वन्ति। भगवति अनन्यं प्रेमैव भक्तिमार्गस्य प्राण-स्वरूपमस्ति यस्याभावे भक्तिः निष्प्राणा आडम्बरमात्रमेव भवति। महत्त्व-मेतत्स्वीकुर्वता देवर्षिणा नारदेन भक्तिलक्षणेऽस्य निवेशः श्रेयस्करोऽभिमतः— सा त्वस्मिन् परमप्रेमरूपा च।

योगिराजस्यारविन्दस्य मतेनापीश्वरप्राप्तिमार्गे प्रेमैव पाथेयमस्ति येनावश्यमेव प्रभुः प्राप्तुं शक्यते। "अनिर्वचनीयं प्रेमस्वरूपम्" (५१) इतिसूत्रानुसारं देवर्षिणा नारदेन प्रेमस्वरूपस्यानिर्वचनीयत्वमुपस्थापयता प्रोक्तं यत् अस्यामवस्थायां भवतो यद् भगवत्स्वरूपामृतमास्वादयन्नपि न तद् वाणीद्वारा विशदीकर्तुं प्रभवति। "तत्प्राप्य तदेवावलोकयति, तदेव शृणोति तदेव चिन्तयति च" (५५) भक्तो यदाऽऽत्मानमसहायं मत्वा प्रेममयस्य परमात्मनश्चरणयोरात्मानं समर्प्य तदिच्छानुसारी जायते तदा स एव तस्य योगक्षेमं निर्वहति। इयमेव गीतोक्ता मुख्या शरणागतिः, इयमेव भवसागरसन्तरणाय सुगमं साधनमस्ति, सर्वाश्रयाणामप्याश्रये सच्चिदानन्दस्वरूपे परमात्मनि तल्लीनतासम्पादनाय च श्रेयस्करः पन्थाः।

आभारप्रदर्शनम्

स्वप्नेश्वरभाष्यसमन्वितस्य हिन्दीभाषायुतस्य च शाण्डिल्यभक्तिसूत्रस्य सम्पादनं कुर्वता मयाऽनेकत आवश्यकीयं साहाय्यं समुपलब्धम्। तत्र साहित्यपुराणेतिहासाचार्य डॉ० लालबिहारीशर्मपाण्डेयेन, पुराणेतिहासाचार्येण श्रीहरिहरदीक्षितेन च ग्रन्थस्यास्य पूर्वरूपसंशोधनादिकर्मसु महत् साहाय्यं व्यधायीति तदर्थमेतावुभावपि शुभाशीर्वचोभिः समाजयन्नहममन्दमानन्दमनुभवामि।

अन्ते मुद्रणभारं गृहीत्वा महता परिश्रमेणाचिरं प्रकाशयितुं प्रयतमानाय भारतमनीषासंस्कृतग्रन्थमालाप्रधानसंपादकाय श्रीसातकडिमुखोपाध्यायमहोदयायानेकशो धन्यवादान् वितरन्नाशंसामि—

संसारसिन्धुमतिदुस्तरमुत्तितीर्षो-
नान्यः प्लवो भगवतः पुरुषोत्तमस्य।
लीलाकथारसनिषेवणमन्तरेण
पुंसो भवेद्विविधदुःखदवार्दितस्य॥

वाराणसेयः संस्कृतविश्वविद्यालय;
वाराणसी।
गङ्गादशहरा
सं० २०१०

विदुषां वशंवदः
श्रीकृष्णमणित्रिपाठी
प्राध्यापकोऽध्यक्षश्च
पुराणेतिहासविभागस्य

शाण्डिल्यभक्तिसूत्रम्

आचार्यस्वप्नेश्वरकृतभाष्यसहितम्

प्रथमाध्याये प्रथमाह्निकम्

प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।
शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥ १ ॥

गोविन्दचरणद्वन्द्वमधुनो महदद्भुतम् ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ २ ॥

जीवानां ब्रह्मभावापत्तिर्मुक्तिरिति वक्ष्यते । जीवाश्च ब्रह्मणोऽत्यन्तमभिन्ना इति तेषां संसारस्त्रिगुणात्मकान्तःकरणोपाधिकृतो न साहजिकः स्फटिकस्येव जपादिसन्निधिकृतं लौहित्यादिकम् । स चौपाधिकत्वादेव न ज्ञानेन निवर्त्तनीयः, किन्तूपाध्युपधेययोरन्यतरहानेन तत्सम्बन्धहानेन वा । न हि निपुणतरदर्शनेनाप्युपाधियोगे स्फटिकलौहित्यभ्रमनिवृत्तिरस्ति । तथेह न सर्वसत्तास्फुरणात्मनो हानिः सम्भवति, न वा सम्बन्धस्य तस्य तदुभयस्वरूपानतिरेकात् परिशेषादुपाधिहानादेव भ्रमनिवृत्तिर्नात्मज्ञानात् ; उपाधिहाने च करणान्तरमन्वेष्टव्यम्, तच्चेश्वरभक्तिरेवालौकिकत्वाच्छ्रुतिस्मृतिसिद्धा । तथा हि—

तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥

इत्युपक्रम्य,

मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥[१]

इत्युपसंहरन् भगवानेवात्मभक्तेस्त्रिगुणात्मकान्तःकरणलयपूर्वकब्रह्मानन्दावाप्तिलक्षणमुक्तिहेतुतामाह—न चात्मज्ञानवैयर्थ्यम्; अश्रद्धामलक्षालनेन भक्तावुपयोगात्। न त्वपरोक्षान्तःकरणरूपोपाधिधर्माध्यासनिराससमर्थं ज्ञानम्। अत एव "गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति"[२] इति; "ज्ञानसञ्छिन्नसंशयम्" इत्यादावयमर्थः स्फुट एव, न चाज्ञानकृतः संसारो येन ज्ञानान्निवृत्तिरपि वक्तुं शक्या; प्रमाणाभावात्, रजतावयवादेः कारणस्याभावादज्ञातशुक्तित उत्पत्त्यसम्भवाच्च। अपि च "कुतस्तु खलु सौम्यैवं स्यादसतः सज्जायेत"[३] इति श्रुतिः कार्यसत्तया कारणसत्तां बोधयन्ती संसारस्य सत्यत्वमेवाह। नितराञ्च "सत्यसंकल्प"[४] इत्यादिना परमेश्वरसर्गस्य, नापि भगवान् बादरायणः क्वचिदपि सूत्रे संसारस्याज्ञानकल्पितत्वमुक्तवान्; प्रत्युत स्वप्नसृष्टिनिराकरणेन जाग्रत्सृष्टेः सत्यत्वम्। न च दृष्टान्तार्थम्; तन्मानाभावात्। सुखादिधर्माणां तु साहजिकत्वं नोपपद्यते; सुखादयो न साक्षादात्मविकारा आत्मनि प्रतीयमानत्वाद् गौरत्वादिवत्। सुखाद्युपलब्धिः सकरणिका क्रियात्वादित्यत्र लाघवात् समवायेनैव करणजन्यत्वं युज्यते श्रोत्रजन्यत्वमिव शब्दस्य। सुखादयः करणसमवेताः; अनादीन्द्रियग्राह्यगुणत्वात्, शब्दवदिति परमते। उभयमते स्पर्शशून्येन्द्रियग्राह्यगुणत्वात्। आत्मसिद्धिस्तु सर्वसत्ताप्रकाशकतयेति। सर्वमेतद् द्वितीये तृतीये स्फुटीभविष्यति। तस्मात् पुरुषार्थहेतुत्वाद्धर्मस्येव भक्तेर्मीमांसाविवित्सयेदं सूत्रम्—

---

(१) गीता १४।६।७,८,२६। (२) गीता १४।१६। (३) छा० उ० ६।२।२।
(४) छा० उ० ३।१४।२।

अथातो भक्तिजिज्ञासा ॥ १ ॥

(सुधा टीका)—अब भक्तितत्त्व का विचार किया जाता है ॥ १ ॥

अथेत्यधिकारार्थः, नानन्तर्यार्थः, आनन्तर्यं हि न स्वाध्यायाध्ययनस्य, आनिन्द्ययोन्यधिकृतेर्वक्ष्यमाणत्वात्। नापि शमादिसम्पत्त्यर्थः, मुमुक्षामात्रस्य भक्त्यधिकारत्वात्। यथा मन्त्रवर्णः—

यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ॥[1]

न च मङ्गलार्थोऽपि तदुच्चारणमात्रस्य मङ्गलत्वात्। तथा च मुमुक्षुणा भक्तिविचारः कर्तव्य इत्यर्थः। जिज्ञासया विचार आक्षिप्यते—यद्यपि परमेश्वरानुरक्तिरूपाया भक्तेर्न धर्मवत् कृतिसाध्यत्वम्, न वा ब्रह्मवद् ज्ञेयत्वम्; तथापि तस्याः स्वकारणपूर्वसुकृतैहिकगौणभक्त्यादिसम्पन्नाया अपि नेयं भक्तिः, नेयं निःश्रेयसार्था, नेयमुत्तमविषयेत्यादिकुतर्ककवलनेन निवृत्तिरपि भवति, यथा पत्यौ पत्न्याः। तन्निरासमुखेनैव तन्मीमांसाया भक्तावुपयोग इति, अत शब्देनोच्यते—यतः कुतर्कनिरासोऽपेक्षणीयः, अतस्तज्जिज्ञासेति। अत एव—

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम्।
तेषु तेष्वचला भक्तिरच्युतास्तु सदा त्वयि ॥[2] इति

तदविच्युतिप्रार्थनमपेक्षितत्वादिति, अत एव च फलवद्भक्त्यङ्गमपि विचारः फलवानेवेति ॥ १ ॥

अथ तस्या लौकिकाकारतामन्तरेण बुद्ध्यनारोहान्न विचारविषयत्वमतस्तल्लक्षणमुच्यते—

सा पराऽनुरक्तिरीश्वरे ॥ २ ॥

वह भक्ति ईश्वर के प्रति अत्यन्त अनुरागरूपा है ॥ २ ॥

अत्र सा परेति लक्ष्यनिर्देशः, शेषं लक्षणम्। परेति गौणीं व्यावर्तयति। ईश्वर इति प्रकृताभिप्रायम्। आराध्यविषयकरागत्वमेव सा। इह तु परमेश्वरविषयकान्तःकरणवृत्तिविशेष एव भक्तिस्तद्वैशेष्यं च लौकिकानुरागादौ

(१) श्वे० उ० ६।१८।　　(२) वि० पु० १।२०।१८।

सुग्रहम्। यथोक्तं परभक्तिमता प्रह्लादेन—

या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥[1]

अत्र प्रीतिपदेन सुखनियतो राग एव लक्षितः, अन्यथा प्रीतेः सुखरूपाया निर्विषयत्वेन विषयसप्तमी न स्यात्, तस्याः सुखज्ञानरूपत्वेऽपि तज्ज्ञानस्य सुखविषयत्वाद्विषयविषयत्वासम्भवात्। तस्मादनुरक्तिरेव सविषयिणी लक्षिता। न च विषयजन्यप्रीतिरर्थः, जनकसप्तम्या अननुशासनात्। किञ्च 'अच्युतास्तु सदा त्वयि'' इत्यत्र भक्तेरीश्वरविषयतासिद्धौ प्रतिपदेनापि तदेकवाक्यतया सैवोच्यते। पूर्वं प्रतिजन्म भक्तिप्रार्थनम्, इह तु विषयरागदृष्टान्तेन तस्या एव सर्वथाऽप्यपरिहार्यत्वप्रार्थनामिति विशेषः। विषयजन्यप्रीतिरपि रागं विना न सम्भवतीति रागावश्यकत्वम्। तथा च पातञ्जलसूत्रम्— 'सुखानुशयी रागः''[2] इति। तस्यैव वक्ष्यमाणलिङ्गेषु व्यापनाल्लाघवाच्च भक्तित्वम्, न तु क्वचित् स्मरणस्य, क्वचित् कीर्तनादेः, अननुगमात्। न च तज्ज्ञानस्य तत्त्वम्; द्वेषादिमत्स्वपि तत्प्रसङ्गात्। नाप्याराध्यत्वेन ज्ञानम्, सा पूजानमस्काराद्याराधनास्वननुगमात्। अपि च बलाद्भयाद्वा नमस्कार्यत्वादिज्ञानवत्यपि भक्तोऽयमनुरक्तोऽयमिति व्यवहारापत्तेः। अनुरागादिसहिताराध्यत्वज्ञानमिति चेत्, अनुराग एवास्तु। अत एव—

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥[3]

इत्यादौ तद्गतचित्तप्राणादीनां भजनमुक्तम्, नाराध्यत्वेन ज्ञानवतामेव। अत एव च कृष्णस्य कमनीयाकृतिदर्शनेनानुरक्तानां गोपतरुणीनामपि भक्तिफलं

(१) वि० पु० १।२०।१७। (२) यो० सू० २।७। (३) गीता १०।९,१०।

भुक्तिः स्मर्यते । अनुस्तु न लक्षणान्तर्गतः, किन्तु भगवन्महिमादिज्ञानादनु पश्चाज्जायमानत्वादनुरक्तिरित्युक्तम् । ननु पित्रादिगोचरानुरागस्यापि प्रकृतभक्तित्वं प्रसज्येत; जगत एव परमेश्वरात्मत्वात् । अथ विकाराविशिष्ट एव तथात्वं वाच्यम्; तथापि गोपीप्रभृतीनां प्रादुर्भावावच्छिन्नेश्वरभक्तावव्यापकम् । उच्यते—"जीवोपाध्यनवच्छिन्नचेतनविषयिणी अनुरक्तिरेव सा" इति । एवञ्च प्रादुर्भावावच्छिन्ने परिपूर्णे च रक्तिः संगृहीता भवति ॥२॥

तत्संस्थस्यामृतत्वोपदेशात् ॥ ३ ॥

क्योंकि ईश्वर में जिसकी निष्ठा है वह अमृतत्व को प्राप्त कर लेता है, ऐसा छान्दोग्य श्रुति का उपदेश है—'ब्रह्मसंस्थोऽमृतत्वमेति' (२।३।२) ॥३॥

तस्मिन्नीश्वरे संस्था भक्तिर्यस्य स तथोक्तः, तस्यामृतत्वं फलमुपदिश्यते—ब्रह्मसंस्थोऽमृतत्वमेतीति[१] । तस्मान्निष्फलत्वगौणफलत्वनिबन्धना तदजिज्ञासा परिहृता भवतीति ॥ ३ ॥

ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः ॥४॥

उक्त वाक्य में संस्था का अर्थ ज्ञान है यह कहना ठीक नहीं; क्योंकि ज्ञान तो द्वेष करने वाले शत्रु को भी होता है, पर वह ज्ञातव्य के प्रति निष्ठा का बोधक नहीं ॥४॥

ननु ब्रह्मसंस्थाशब्देन ब्रह्मज्ञानमेवोच्यते, न तु तद्भक्तिः, तथा चामृतत्वफलं तस्यैवेति चेद् ब्रूषे ? नैष दोषः । संस्था भक्तिरेव न ज्ञानम्; द्विषतस्तज्ज्ञानवतोऽपि तत्संस्थत्वव्यवहाराभावात् । राजाद्यनुरक्ताः खल्वमात्यमित्रादयस्तत्संस्था इति व्यपदिश्यन्ते, न पुनः प्रतिपक्षभूपालाः । शब्दार्थनिर्णयो हि लोकवदेव वेदेऽपीति । अत एव चिरकालिकोपाख्याने—

विमृश्यते न कालेन पत्नीसंस्थाव्यतिक्रमः ।
सोऽब्रवीच्च भृशं तप्तो दुःखेनाश्रूणि वर्तयन् ॥

इत्यनेन पतिभक्त्यतिक्रम उक्तः । तस्मात् संस्था भक्तिरिति । एवञ्च—तन्निष्ठस्य मोक्षोपदेशात्,[२] इति । बादरायणीयसूत्रस्याप्ययमेवार्थोऽध्यवसेय इति ॥ ४ ॥

---

(१) छा० उ० २।२३।१ । (२) ब्र० सू० १।७ ।

तयोपक्षयाच्च ॥ ५ ॥

भक्ति के उदय होने से ज्ञान का क्षय होता है। अतः भक्ति-ज्ञान की एकता नहीं है ॥५॥

तया भक्त्या मुक्तिं प्रति ज्ञानमुपक्षीणं यस्मात्। चकार उक्तयुक्तिसमुच्चयार्थः।

देवान् देवजनो यान्ति मद्भक्ता यान्ति मामपि।[1] इत्यादि।

तथा प्रह्लादं प्रति भगवद्वाक्यम्—

यथा ते निश्चलं चेतो मयि भक्तिसमन्वितम्।
तथा त्वं मत्प्रसादेन निर्वाणमपि यास्यसि ॥[2]

इति स्थितम्।

ननु "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"[3] इत्यत्र वेदनफलं मुक्तिः श्रुता तद्विरोधेन स्मृतीनामन्यार्थत्वं स्यादिति चेत्? न अत्रापि तयैवोपक्षयात्। तथाह्यतिमृत्युपदं न मुक्तौ रूढम्, किन्तु यस्यां सत्या मृत्योरतिक्रम इति व्युत्पत्त्या तदपेक्षायां यतो भक्तेर्मृत्य्वतिक्रम इति व्युत्पाद्य भक्तिमेवातिमृत्यु-पदेनाभिधत्ताम्; उपपदविभक्त्यर्थापेक्षया कारकविभक्त्यर्थस्य बलवत्त्वात्,

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ॥[4]

इत्यादिना भक्तितो मृत्य्वतिक्रमप्राप्तेः। मन्त्रश्च भवति—"त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्"[5] इति। अत्र यजनं भक्तिः, तथैव तत्कल्पव्याख्यानात्। न चास्यां श्रुतौ भक्तेरसन्निधानं मुक्तावपि तुल्यत्वात्। तस्मादनपायिश्रुत्या ज्ञानस्योपक्षय एव प्रतीयत इति ॥ ५ ॥

ननु तथापि भक्ते रागरूपत्वे किं कारणमित्यपेक्षायामाह—

द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः ॥ ६ ॥

द्वेष की विरोधिनी एवं रसशब्द से प्रतिपाद्य होने के कारण भी भक्ति रागस्वरूपा ही मानी गयी है ॥ ६ ॥

---

(१) गीता ७।२३। (२) वि० पु० १।२०।२१। (३) श्वे० उ० ६।१५। (४) गीता १२।७। (५) शुक्ल यजुर्वेद ३.६०।

भक्तिः खलु राग एव भवितुमर्हति, कुतः ? द्वेषविरोधित्वात् । लोके हि द्वेष्टाऽयं भक्तोऽयमिति मिथो विरुद्धधर्मवति व्यवह्रियते, तत्र द्वेषविरोधी च राग एव प्रसिद्धः, न ज्ञानादिः । एवञ्च वैष्णवे भगवति शिशुपालस्य द्वेषानुबन्धमभिधाय अयं हि भगवान् कीर्तितः संस्मृतश्च द्वेषानुबन्धेनापि अखिलसुरासुरदुर्लभं फलं प्रयच्छति, किमुत सम्यग्भक्तिमतामित्युक्तम् । तथा चात्रिस्मृतौ—

विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन् ।
शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः ।। इति ।

तत्रापि द्वेषविरोधित्वेन भक्तेरभिधानात् । तथा च गीतासु—

मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।
तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।।[1]
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् । इति ।

तद्विरोधिनी च भक्तिरीश्वरविषयैवानुरक्तिरिति युज्यते । किञ्च, "रसं ह्येवायं लब्ध्वानन्दी भवति"[2] इति शब्दाद् ब्रह्मानन्दाविर्भावमुक्तेर्ब्रह्मगोचरस्य रसस्य हेतुताऽवगम्यते । रसश्च रागः—

रसवर्ज्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ।[3]

इत्यादौ प्रसिद्धः । अत्र रसो विषयरागः । अत एव च रामलक्ष्मणादीनां स्वर्लोकारोहणमुक्त्वा येऽपि तेषु भगवदंशेष्वनुरागिणः कोशलनगरजानपदास्तेऽपि तन्मनसस्तत्सलोकतामापुरिति साक्षादेव भक्तावनुरागशब्दः प्रयुक्त इति । तस्मादपि न ज्ञानम्, किन्त्वनुरागरूपैव भक्तिर्निःश्रेयसफलेति । ननु द्वेषविरोधित्वं न रागत्वे लिङ्गम् ; उदासीनत्वेनानैकान्त्यादिति चेत् ? उच्यते—"द्वेषकार्यं निवृत्तिस्तद्विरोधिनी प्रवृत्तिः" इति । भवति च भक्तानां भजनीयानुवर्तनादौ प्रवृत्तिस्तद्विरोधिनां तदनुवर्तनादौ निवृत्तिः । एवञ्च कार्यमुखेन

---

(१) गी० १६।१८,२० । (२) तै० उ० २।७ । (३) गीता २।५९ ।

विरोधमभिप्रेत्य द्वेषविपक्षेत्युक्तम्। तथा च प्रयोक्तव्यं भक्तिर्भजनीयगोचररागरूपा तदनुवर्तनादिहेतुहितसाधनताधीभिन्नात्मविशेषगुणत्वाद् यन्नैवं तन्नैवं यथा द्वेषः; रागोत्कर्षेण तदनुवर्तनाद्युत्कर्षस्य दृष्टत्वाच्च। किञ्च यो यस्मिन् भक्तस्तत्र तस्यौदासीन्याभावेऽवगते भक्तिस्तादृशानुवर्तनाद्यनुकूलद्वेषविरोधिगुणरूपा अनुवर्तनहेत्वात्मविशेषगुणत्वाद्धितसाधनताधीवदिति हितसाधनताधीत्वबाधसहकारेण परिशेषाद् रागत्वसिद्धिः। किमुत भक्तिमतामित्येतत्कैमुतिकन्यायो विरोधिन्येव द्रष्टव्यः—

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।

किं पुनर्ब्राह्मणाः पुण्याः भक्ता राजर्षयस्तथा।[१] इत्यादौ च। एवं "मामात्मपरदेहेषु"[२] इत्यनेन द्वेषस्य संसारहेतुत्वात् तद्विरोधिगुणो जीवोपाधिपरिहारेण परात्मगोचरो राग एव भक्तिरूपः संसारनाशहेतुः। एतदेवोक्तं मामप्राप्यैवेति। चकारात् पुलकादिरागलिङ्गेनापि रागत्वम्। प्रसिद्धं हि "पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन" इत्यादौ। भक्तेर्गुणान्तरत्वे तु पृथग् लिङ्गताकल्पने गौरवात्। स च रागः केषाञ्चिदिष्टसाधनताज्ञानजन्योऽपि यागादिवदिच्छारूप एव। अस्माकं तु "प्रीणाम्यनुरज्यामि नेच्छामि" इत्यादिप्रतीते रागः पृथगेव द्वेषवत्। इच्छाया असिद्धमात्रविषयत्वाद्रागस्य सिद्धासिद्धविषयत्वाच्च। प्रत्युत तस्येच्छात्वादिव्याप्यत्वकल्पनागौरवाच्चेति दिक्। तस्मान्न तल्लक्षणासिद्धिरिति ॥ ६ ॥

ननु भक्तिः क्रियात्मिका सा च निःश्रेयसाय न क्षमते "न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः"[३] इत्यादिश्रुतिभ्य इत्याशङ्क्यां परिहरन्नाह—

न क्रिया कृत्यनपेक्षणाज्ज्ञानवत् ॥ ७ ॥

भक्ति क्रियारूपा नहीं है, क्योंकि ज्ञान के समान वह भी कर्ता के प्रयत्न की अपेक्षा नहीं रखती ॥ ७ ॥

सा भक्तिर्न क्रियात्मिका भवितुमर्हति; प्रयत्नानुविधानाभावात्। यन्न प्रयत्नानुविधायि तन्न क्रियात्मकम्, यथा ज्ञानम्। तद्धि प्रमाणसम्पत्त्यधीनं न पुरुषेण स्वेच्छया कर्तुमकर्तुमन्यथा कर्तुं शक्यते। तथा भक्तिरपि। न हि रागिणां

(१) गीता ९।३२,३३। (२) गीता १६।१८। (३) कै० उ० १।३।

प्रमदापुत्रादिविषयिणी पुंव्यापारेण तथा तथा भवति भक्तिः, किन्तु पूर्वसूक्तगौण-भक्त्यादिसाधनाधीनेति ॥ ७ ॥

अत एव फलानन्त्यम् ॥ ८ ॥

इसी लिए इसका फल अनन्त बतलाया गया है ॥ ८ ॥

यतः सा न क्रियात्मिका अत एव तत्फलस्य निःश्रेयसस्यानन्त्यत्वमुपपद्यते। अन्यथा—"तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते"[1] इत्यनेनामृतत्वस्यापि क्षयित्वं प्रसज्येतेति ॥ ८ ॥

तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत् ॥ ९ ॥

ज्ञानी को भी शरणागत होना गीता में उपदिष्ट है 'ज्ञानवान् मां प्रपद्यते' (७।१९), अतः शरणागति भक्ति ज्ञानरूप नहीं है। जिस प्रकार सकामी अज्ञानी कामनावश अन्य देवता की शरण लेते हैं, 'कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्य-देवताः' (गी० ७।२०) किन्तु उनकी वह शरणागति ज्ञानरूप नहीं है, उसी प्रकार भगवच्छरणागति भी ज्ञान से भिन्न है ॥ ९ ॥

भवति हि भगवद्वाक्यम्—

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥[2]

इति ज्ञानवतः प्रपत्तिरुक्ता। भक्तेर्ज्ञानहेतुत्वे नेदमुपपद्यत इतरप्रपत्तिवदिति, यथा तदनन्तरम्—

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।[3]

इत्यनेन देवतान्तरप्रपत्तिनिन्दामुखेनैव प्रपत्तिः स्तूयते। तत्र देवताभक्तेरेव प्रपत्तिशब्देन कथनं न तज्ज्ञानस्य; तस्या एव प्रपत्तेरुभयत्र प्रत्यभिज्ञानादिति। चकाराज्ज्ञानानन्तर्यश्रवणमपि ज्ञानत्वाभावे निदानम्। यथा—

यो मामेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत ॥[4] इति।

तथा—

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ [5]

(१) छा० उ० ८।१६। (२) गीता ७।१८। (३) गीता ७।२०। (४) गीता १५।१९। (५) गीता ९।१३।

इति च, तस्मान्न ज्ञानात्मिका। यद्यपि रागत्वेनैव ज्ञानभेदः सिद्धस्तथापि भक्तिशब्दो ब्रह्मज्ञाने गौण इति शङ्कानिरासार्थमेतत्। इदं तु चिन्त्यते, भगवद्गीतावाक्यानि न शब्दविधया वेदवत् प्रमाणम्, किन्तु भारते स्मृतित्वेन। तथा च कथं शब्दादिति निर्देशः। अत्रैकेऽनुमितशब्दादिति व्याचक्षते। अत्रोच्यते—अदृष्टार्थकभगवद्वाक्यत्वमेव वेदत्वम्, तच्च गीतास्वप्यविशिष्टम्। अत एव भगवद्गीतासूपनिषत्स्विति दृश्यते। केवलं त एव श्लोका व्यासेन निबद्धाः। तथा च पुराणान्तरम्—

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृताः॥[१]

न च शूद्राणामश्रवणप्रसङ्गः; भारतश्रवणाभ्यनुज्ञानेनैव तदुपपत्तेः प्रणवादिस्तुत्यादिवत्। तद्विहायेति चेत्? न लक्षताऽपरिपूर्तेः। तथा चोक्तमाचार्यैः—

तानेव वैदिकान् मन्त्रान् भारतादिनिवेशितान्।
स्वाध्यायनियमं हित्वा लोकबुद्धया प्रयुञ्जते॥ इति॥ ९॥

इत्याचार्यस्वप्नेश्वरविद्वद्विरचिते शाण्डिल्यशतसूत्रीयभाष्ये
प्रथमाध्यायस्य प्रथममाह्निकम्॥ १॥

—:o:—

प्रथमाध्याये द्वितीयाह्निकम्

एवममृतत्वं प्रत्यनन्यथासिद्धायां भक्तौ लक्षितायां ज्ञानयोगभक्तीनामङ्गप्रधानभावविवेकाय द्वितीयाह्निकस्यारम्भः।

सा मुख्येतरापेक्षितत्वात् (१)॥ १०॥

वह भक्ति मुख्य है; क्योंकि ज्ञान, योग आदि अन्य साधन उसकी अपेक्षा रखते हैं। अतः अन्य साधन मुख्य नहीं है किन्तु भक्ति मुख्य ही है॥ १०॥

आह्निकसमाप्तावुक्तस्य पुनः स्मरणाय सेति निर्देशः। सा परा भक्तिर्मुख्या प्रधानम्; इतरैरात्मज्ञानयोगादिभिः स्वोपकार्यतयापेक्षितत्वादित्यर्थः। छान्दोग्ये "यो वै भूमा तत्सुखम्"[२] इत्याद्युपक्रम्याम्नायते—"आत्मैवेदं सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति"[३] इति तत्रात्मरतिरूपायाः परभक्तेः पश्यन्निति दर्शनमप्रियत्वादिभ्रमनिरासमुखेनाङ्गं भवति। यथा दण्डी प्रैषमन्वाह,

(१) गी० मा० २५। (२) छा० उ० ७।२३।१। (३) छा० उ० ७।२५।२।

प्राचीनावीती दोहयति, अभिजानन् जुहोति, धनवान् सुखवानित्यादौ दण्डाद्यङ्गम्, तथा दर्शनमपि रतेरङ्गं मननविज्ञानयोरुक्तप्रदर्शनार्थतया न्यायप्राप्तयोरनुवादः। एवमात्मक्रीडादेरतिनैयत्यादर्थप्राप्तोऽनुवाद एव, अन्यथा रत्युद्देशेन दर्शनादिविधौ, दर्शनाद्युद्देशेन वा रत्यादिविधौ वाक्यानि भिद्येरन्। तस्मात् "शेषः परार्थत्वात्"[1] इति न्यायाद्दर्शनमङ्गमिति। अत एव भगवान् मनुरपि—

यस्त्यक्त्वा प्राकृतं कर्म नित्यमात्मरतिर्मुनिः।
सर्वभूतात्मभूतात्मा स गच्छेदुत्तमां गतिम्॥[2]

इत्यनेनात्मरतेः प्राधान्यमाहेति॥ १०॥

प्रकरणाच्च (२)॥ ११॥

छान्दोग्योपनिषद् में भी प्रकरणतः भक्ति को ही मुख्य माना गया है। क्योंकि वहाँ रतिरूपा भक्ति का ही फल स्वाराज्य सिद्धि कहा गया है॥ ११॥

प्रकरणं रतेरेव फलवत्त्वात् तस्यास्तत्प्रकरणस्थं दर्शनमङ्गं भवितुमर्हतीति॥ ११॥

दर्शनफलमिति चेन्न, तेन व्यवधानात् (३)॥ १२॥

यदि कहें कि वहाँ दर्शन का ही फल स्वाराज्य माना गया है तथा प्रकरण भी उसी का है तो ठीक नहीं; क्योंकि वहाँ 'सः' पद से समीपवर्ती आत्मरति का ही ग्रहण होता है, दूरवर्ती अन्य पद का नहीं, क्योंकि वहाँ अन्यपदों से व्यवधान है। अतः वहाँ आत्मरतिरूपा भक्ति का ही फल स्वाराज्य सिद्धि है, दर्शन का नहीं।

अथ दर्शनस्यैव फलं स्वाराज्यलक्षणममृतत्वं तथा च तस्यैव प्रकरणमिति वैपरीत्यमिति चेत्, ? न; तेन तच्छब्देन व्यवधानात्। "स स्वराड् भवति"[3] इत्यत्र तच्छब्देन सन्निकृष्टात्मरतिमानेवोपस्थाप्यते, न विप्रकृष्टः पश्यन्निति व्यवहितोपस्थितौ कारणाभावात्। प्रकरणमेव कारणमिति चेत्? न; नअन्योन्याश्रयात्॥ १२॥

दृष्टत्वाच्च (४)॥ १३॥

संसार में ऐसा ही देखा गया है कि किसी के रूप का दर्शन, गुण का श्रवण अथवा स्वरूप का परिचय पहले होता है और बाद में उसके प्रति·

---

(१) पू० मी० ३।१।२। (२) म० भा० शा० प० १९४।४६। (३) छा० उ० ७।२५।२।

अनुराग उत्पन्न होता है। अतः दर्शन या ज्ञान का फल अनुराग है, अनुराग का फल ज्ञान नहीं। इसलिए भक्ति ही मुख्य है, ज्ञान अङ्ग माना गया है ॥ १३ ॥

दृष्टं हि लोके सौन्दर्यादिज्ञानस्य तरुण्यास्तरुणे रतिहेतुत्वम्, न तु रतेर्ज्ञानहेतुत्वमिति दृष्टोपकारत्वादप्यङ्गत्वमवसीयते। दृष्टं च प्रकृतेर्निष्करुणत्वाल्पमहिमत्वाप्रियत्वादिज्ञानं मनोमालिन्यकारणं भूतेषु करुणाबहुलाव्याहतैश्वर्यातिशयितरूपाश्रय आत्मेति ज्ञानान्मालिन्यनिवृत्तिस्ततः परा भक्तिरिति। अत एव गीयते—

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥[1] इति।

तथा आयुर्वेदेऽपि

धीर्धैर्यात्मादिविज्ञानं मनोदोषौषधं परम्।[2] इति ॥ १३ ॥

अत एव तदभावाद्वल्लवीनाम् (५) ॥ १४ ॥

इसीलिए भक्ति का प्राधान्य एवं ज्ञान के अप्राधान्य होने के कारण ज्ञान के अभाव में भी केवल परमाणुरागरूपा भक्ति से ही गोपाङ्गनाओं की मुक्ति हो गयी ॥ १४ ॥

यत एव ज्ञानं दृष्टोपकारकमङ्गम्, अत एव दृष्टोपकारं निरस्य मनोमालिन्यादिबाधात् प्रधानभगवदनुरागमात्रेण वल्लवीनां मुक्तिः स्मर्यते। यथा—

तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया सती।
तदप्राप्तिमहादुःखविलीनाशेषपातका ॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम्।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ॥[3] इति।

अत्र सुखदुःखलिङ्गेनानुरागोऽनुमीयते, न मुक्तिरिति वाक्यार्थः। द्वारबाधादनवहतकृष्णलेनापि कर्मणा फलसिद्धिरिव तासां रागान्मुक्तिस्तदप्यवगम्यते ज्ञानमङ्गमेव, प्रधानत्वे तु तदभावे फलं न स्यात्, चिन्ता च न ब्रह्मात्मैक्यज्ञानं तत्कारणश्रवणमननाद्यसम्भवात्, किन्त्वनुरागनियतानुस्मृतिरेव। न चायमर्थवादः, अपूर्वार्थत्वात् सन्निधौ विध्यभावाच्चेति ॥ १४ ॥

---

(१) गीता ५।१७। (२) अ० हृ० १।२३। (३) वि० पु० ५।१३।१४,१५।

भक्त्या जानातीति चेन्नाभिज्ञप्त्या साहाय्यात् (६) ॥ १५ ॥

यदि ऐसा कहें कि भक्त भक्ति द्वारा ही मुझे भलीभाँति जानता है 'भक्त्या मामभिजानाति' (१८।५५) इस गीतावचन के अनुसार भक्ति ही साधन तथा ज्ञान साध्य प्रतीत होता है तो ठीक नहीं, क्योंकि अभिपूर्वक ज्ञाधातु का अर्थ है अभिज्ञा, अभिज्ञा कहते हैं पूर्वज्ञात वस्तु के ज्ञान को। प्रथम ज्ञान होता पश्चात् फलरूपा भक्ति होती है। अतः भक्ति ही अभिज्ञप्ति रूप से पूर्व ज्ञान का स्मरण कराकर स्वयं जीव के भगवत्प्रवेश में सहायका होती है।

इदानीं श्रुतिविरोधेन प्रकरणस्थानलिङ्गबाधमाक्षिप्य समाधीयते। यथा श्रुतम्

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥[१] इति।

तत्र "ऐन्द्रचा गार्हपत्यमुपतिष्ठते"[२] इतिवत् कारकश्रुत्या बलीयस्या भक्तेर्ज्ञानहेतुत्वमवसीयते। यद्यपि दृष्टत्वादित्यनेन दृष्टोपकारे प्रत्यक्षगम्ये न श्रुतेरवकाशः, तथापि ब्रह्मविषयिण्या रतेर्ब्रह्मविषयज्ञानोपकार्यत्वं न प्रत्यक्षगम्यम्, किन्तु तरुण्यादे रतौ तथा दर्शनेन ब्रह्मगोचरायामप्यनुमातव्यम्। तथा च लिङ्गत्वे पर्यवसानादिति चेत्? न दोषः। तथा हि यदि केवलं जानातीति वदेन्न त्वेवम्, किन्त्वभिजानातीति। अभिज्ञा पूर्वज्ञातज्ञानमुच्यते। तथा भक्त्युपकारिपूर्वज्ञानं तत्फलरूपभक्तिप्रवर्तकम्। अनन्तरं यावत् तद्दाढर्चं भक्त्यैवाभिज्ञप्तिभावेनापेक्ष्यते व्रीह्यवहननेनावघातवदिति। कार्यसाहाय्यार्थमुक्तम्, ततो ज्ञानदाढर्चेन भक्तिदाढर्चे सति विशत इति। तस्मान्नेयं श्रुतिः, किन्तु न्यायप्राप्तानुवाद इति। एतमेवार्थं स्फुटीकरोति ॥ १५ ॥

प्रागुक्तं च (७) ॥ १६ ॥

प्रथम ब्रह्मज्ञान होता है पश्चात् भक्ति का उदय होता है यह पूर्वश्लोक में ही कही गया है ॥ १६ ॥

भक्त्या मामित्यस्य पूर्वं ब्रह्मभूयाय कल्पत इत्यभिधाय—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥[३]

इत्युक्तम्। तस्य तु ज्ञानब्रह्मणो ज्ञानप्रयोजनाभावाद् युक्तमनुवादत्वमिति ॥ १६ ॥

---

(१) गीता १८।५५। (२) तै० सं० १।५।८। (३) गीता १८।५४।

एतेन विकल्पोऽपि प्रत्युक्तः (८) ॥ १७ ॥

ज्ञान अङ्ग है और भक्ति अङ्गी इस प्रकार का निश्चय होने से इन दोनों विकल्प पक्ष एव समुच्चयवाद का खण्डन हो जाता है। अतः ज्ञान और भक्ति दोनों अङ्ग हैं तथा दोनों अङ्गी भी हैं इस प्रकार की विकल्पात्मक मान्यता नहीं है। तथा ज्ञान एवं भक्ति दोनों एक साथ मुक्ति के साधक हैं यह समुच्चय वाद भी ठीक नहीं। अर्थात् विकल्प तथा समुच्चयवाद दोनों पक्षों का खण्डन है ॥ १७ ॥

एतेन ज्ञानस्याङ्गत्वनिर्णयेन ज्ञानभक्त्योरत्र विकल्पपक्षोऽपि प्रत्युक्तः, निराकृत इति मन्तव्यम्। न ह्यङ्गाङ्गिनोरेकत्र विकल्पो भवतीति। अपिशब्दात् समुच्चयोऽपीति ॥ १७ ॥

देवभक्तिरितरस्मिन् साहचर्यात् (९) ॥ १८ ॥

'यस्य देवे परा भक्तिर्यथादेवे तथा गुरौ' (श्वे. उ ६।२३) इस वचन में गुरु भक्ति के साथ पठित देव विषयक भक्ति भी ईश्वर भिन्न देवता की भक्ति का बोधक है ॥ १८ ॥

क्वचिदेवं श्रूयते—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥[1] इति।

अत्र देवभक्तिरीश्वरेतरस्मिन् देवे मन्तव्या, कुतः? गुरुभक्तिसाहचर्यात्। साहचर्यं हि नामृतफलायां भक्तौ घटते। इन्द्रादिदेवतास्त्वाराधिताः शुभवज्ज्ञान-फलाय भवन्तीति साहचर्यमपि निर्णायकम् साहचर्यादुलूकशब्दवदुक्तयुक्तेरुपष्टम्भ-कमेतत् ॥ १८ ॥

योगस्तूभयार्थमपेक्षणात् प्रयाजवत् (१०) ॥ १९ ॥

योग तो ज्ञान तथा भक्ति दोनों का साधन है; क्योंकि दोनों में उपकारक होने के कारण योग की अपेक्षा रहती है। यद्यपि योग मुख्यतया ज्ञान का अङ्ग है फिर भी जब ज्ञान भक्ति का अङ्ग है तब उसी के साथ योग भी भक्ति का अङ्ग हो सकता है। जैसे—वाजपेय का अङ्गभूत प्रयाज उसकी दीक्षा लेने वाले व्यक्तिकी दीक्षा का भी अङ्ग माना जाता है ॥ १९ ॥

योगः पुनर्ज्ञानार्थं भक्त्यर्थं च भवति, समाहितमनस्कताया उभाभ्यामपेक्षणात्। ननु "गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्"[2] इति न्यायात् प्रधानाङ्गं

(१) श्वे० उ० ६।२३। (२) पू० मी० ३।१।२१।

योगः कथमङ्गाङ्गमित्यत आह—प्रयाजवदिति। यथा प्रयाजो वाजपेयाद्यङ्गम्, तदीयदीक्षणीयादेरप्यङ्गं तद्वत्। तदङ्गताबाधकप्रमाणाविशेषात्। केवलं ज्ञानार्थं योगानुष्ठानप्रसङ्गेन भक्तिमुपकरोतीति। एवं विषयवैराग्यमप्युभयार्थं मन्तव्यम् ॥ १९ ॥

ननु "ईश्वरप्रणिधानात्"[1] इति पतञ्जलिस्मरणं दुरपह्नवम्, तत्र प्रणिधानाभिधेयस्य भगवद्भजनस्य समाधिसिद्ध्यर्थत्वमिति कथं भक्तेः प्राधान्यमित्यत आह—

गौण्या तु समाधिसिद्धिः (११) ॥ २० ॥

'ईश्वरप्रणिधानाद्वा' (१।२३) इस योग सूत्र में जो प्रणिधानाद् पद आया है वह गौणीभक्ति का बोधक है। उस गौणी भक्ति से समाधि की सिद्धि होती है ॥२०॥

तत्र प्रणिधानं गौणभक्तिरेव न प्रधानम्, तथा समाधिसिद्धिरिति न स्मृतिविरोधोऽपीति। भवति च वाक्यशेषस्तत्रैव "तस्य वाचकः प्रणवः"[2] "तज्जपस्तदर्थभावनम्"[3] इति ॥ २० ॥

हेया रागत्वादिति चेन्नोत्तमास्पदत्वात् सङ्गवत् (१२) ॥ २१ ॥

यदि भक्ति रागरूपा है तो योगदर्शन में प्रोक्त पाँच क्लेशों (अविद्याऽस्मिता-राग-द्वेषाभिनिवेशाः क्लेशाः २।३) में परिगणित राग में और रागरूप भक्ति में कोई अन्तर नहीं प्रतीत होता. ऐसी दशा में मुमुक्षुजन के लिए यह रागरूपा भक्ति भी त्याज्य ही होगी—ऐसा कहें तो ठीक नहीं; क्योंकि इस राग के आश्रय उत्तम (ईश्वर) हैं। अर्थात् ईश्वर विषयक राग को भक्ति कहते हैं। जिस प्रकार सङ्ग को त्याज्य मानने पर भी कुसङ्ग का ही त्याग उचित माना गया है, सत्सङ्ग का नहीं, क्योंकि सन्त सङ्ग के उत्तम आश्रय हैं उसी प्रकार ईश्वर विषयक राग त्याज्य नहीं है अपितु विषय विषयक राग ही त्याज्य माना गया है ॥ २१ ॥

योगशास्त्रप्रस्तावादिदं सूत्रम्। योगशास्त्रोक्तरागत्वाविशेषाद्भक्तिरपि मुमुक्षुणा हेयैव। तथा च सूत्रम् "अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः"[4] इति। एवञ्चेदुच्यते—नैवं वाच्यम्; उत्तमास्पदत्वाद्भक्तेः परमेश्वरविषयत्वादिति यावत्। नहि रागत्वमात्रेण हेयत्वम्, किन्तु संसारानुबन्धिरागत्वेनैव। यथा सङ्गत्वमात्रेण न त्याज्यता, किन्त्वसत्सङ्गत्वेन तद्वत्। तथा चेश्वरभक्तिर्हेया

(१) यो० सू० १।२३। (२) यो० सू० १।२७। (३) यो० सू० १।२८। (४) यो० सू० २।३।

रागत्वादित्यत्र संसारानुबन्धित्वं मोक्षाननुगुणत्वं चोपाधिः। न चासात्त्विकी सा, "यजन्ते सात्त्विका देवान्"[1] इत्यादिना सात्त्विकत्वकीर्तनादिति ॥ २१ ॥

तदेव कर्मिज्ञानियोगिभ्य आधिक्यशब्दात् (१३) ॥ २२ ॥

इसलिए भक्ति ही सर्वश्रेष्ठ है; क्योंकि भगवान् श्रीकृष्ण ने गीता में कर्मी' ज्ञानी, योगी की अपेक्षा भक्त को ही श्रेष्ठ बतलाया है (६।४६) ॥ २२ ॥

तदेव भजनं मुख्यं तस्या भक्तेर्वा मुख्यत्वम्। एतत् सर्वथैव निश्चितम्, यस्मादेवं शब्यते।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥[2] इति।

अत्र विशेषणानां तपआदीनामाधिक्यनिबन्धनं विशेष्याणामाधिक्यं क्रमादिति मन्तव्यम्। न खल्वङ्गस्य मुख्यादाधिक्यमुपपद्यते, तस्माद् भक्तिः प्रधानमिति ॥ २२ ॥

श्रुत्यर्थेनापि तदुत्पत्तिपरिहारार्थं पठति—

प्रश्नानरूपणाभ्यामाधिक्यसिद्धेः (१४) ॥ २३ ॥

गीता के बारहवें अध्याय में अर्जुन के प्रश्न तथा भगवान् श्रीकृष्ण के उत्तर से भक्त की ही श्रेष्ठता सिद्ध है (१२।१-७) ॥ २३ ॥

अत्र कृत्स्नोऽपि द्वादशाध्याय उदाहरणम्।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥

इति प्रश्नः।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥

(१) गीता १७।४। (२) गीता ६।४६,४७।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ॥[1]

इति निरूपणम् । ताभ्यां भक्तेः प्राधान्यसिद्धेर्नार्थवादत्वमायाति । प्रश्ननिरूपणं हि निर्णयार्थं प्रसिद्धम्, न स्तुत्यर्थमिति । केवलाज्ञानुष्ठानेन क्लेशाधिक्यमेवेति ॥ २४ ॥

श्रद्धाप्रसङ्गाद्भक्तेः श्रद्धारूपत्वशङ्कापिशाचीं निराकरोति—

नैव श्रद्धा तु साधारण्यात् (१५) ॥ २४ ॥

भक्ति को श्रद्धारूप नहीं माना जा सकता है; क्योंकि श्रद्धा साधारणतया कर्ममात्र की अङ्गभूता है किन्तु ईश्वर-भक्ति ऐसी नहीं है ॥ २४ ॥

भक्तिर्न सर्वथा श्रद्धात्वेन शङ्कनीया, श्रद्धायाः कर्ममात्राङ्गत्वात् । न चैवमीश्वरभक्तिरिति ॥ २४ ॥

तस्यां तत्त्वे चानवस्थानात् (१६) ॥ २५ ॥

यदि श्रद्धा को भक्तिरूप मानें तो अनवस्था (अप्रामाणिक कल्पना की अविश्रान्ति) दोष आता है । भगवान् श्रीकृष्ण ने गीता में श्रद्धा को भक्ति का अङ्ग बताया है—श्रद्धावान् भजते यो माम् (६।४७) । श्रद्धा तथा भक्ति को एक नहीं मान सकते ॥ २५ ॥

श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ।[2]

इति हि श्रुतम् । तत्र भक्तौ श्रद्धारूपायां श्रद्धाङ्गत्वे प्रतीतेऽनवस्थाप्रसङ्गात्, श्रद्धाया अनङ्गत्वात् । अन्यथा तस्यामपि श्रद्धान्तरमित्यनवस्थैव । तस्मादारम्भणीयारम्भे आरम्भणीयवदाचमने चाचमनवद्भक्तौ श्रद्धा नाङ्गं स्यात् । श्रद्धाभक्तिसमन्वित इति भेदेन कथनाच्च ॥ २५ ॥

ब्रह्मकाण्डं तु भक्तौ तस्यानुज्ञानाय सामान्यात् (१७) ॥ २६ ॥

वेद में जो ब्रह्मकाण्ड (ब्रह्मतत्त्व निरूपण प्रकरण) है, वह भक्ति के लिए ही है, ज्ञान के लिए नहीं; क्योंकि जैसे ब्रह्मकाण्ड अज्ञात अर्थ का ज्ञान कराता

---

(१) गीता १२।१-७ । (२) गीता ६।४७ ।

है वैसे ही शेष दो काण्ड भी अज्ञात अर्थ का ज्ञान कराते हैं। इस दृष्टि से तीनों काण्ड समान हैं। अतः भक्ति के लिए ब्रह्मकाण्ड का आरम्भ होने के कारण उसे भक्तिकाण्ड भी मानना चाहिए ॥ २६ ॥

ज्ञानाप्राधान्ये ज्ञानकाण्डमित्युत्तरकाण्डप्रसिद्धिर्न स्यादिति मन्वानं प्रत्युच्यते—भक्त्यर्थं ब्रह्मकाण्डं श्रूयते, न ज्ञानार्थम्; अज्ञातार्थज्ञापनस्य काण्डद्वयसामर्थ्यात्। अन्यथा धर्मज्ञानार्थं पूर्वकाण्डाम्नातमपि ज्ञानकाण्डं स्यात्। न च ज्ञानविधिः सम्भवति येन तत्प्राधान्यादपि ज्ञानकाण्डं भवेदिति। तस्माद् ज्ञानकाण्डमिति भ्रमः, किन्तु ब्रह्मकाण्डमेव। अत एव—"अथातो ब्रह्मजिज्ञासा"[1] इति सूत्रितम्। तत्तु भक्त्यर्थत्वाद्भक्तिकाण्डमपीति ॥ २६ ॥

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यभक्तिसूत्रभाष्ये
प्रथमाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

—:०:—

द्वितीयाध्याये प्रथमाह्निकम्

तस्या भक्तेः साक्षात् प्रयत्नानिष्पाद्यत्वेन निष्पत्त्यर्थं साधनान्तरापेक्षा तत्रान्तरङ्गसाधनं ज्ञानं बहिरङ्गसाधनान्यपरभक्तिप्रभृतीनि तेषां विवेकाय द्वितीयाध्यायारम्भः।

बुद्धिहेतुप्रवृत्तिराविशुद्धेरवघातवत् (१) ॥ २७ ॥

बुद्धि ब्रह्मज्ञान के हेतुभूत श्रवण, मनन, निदिध्यासन आदि साधनों में तब तक लगे रहना चाहिए जब तक कि अन्तःकरण शुद्ध न हो जाय! जैसे 'व्रीहीनवहन्ति' (धान कूटे) इस वाक्य के अनुसार धान पर तब तक मूसल का आघात करते रहना आवश्यक है जब तक कि सारी भूसी अलग न हो जाय ॥ २७ ॥

बुद्धिर्ब्रह्मप्रमितिः, सा यद्यपि कृत्यनिष्पाद्या; तथापि तद्धेतूनां श्रवणमनननिदिध्यासनादीनां तन्निष्पत्तयेऽनुष्ठानमावश्यकम्। तत्किं "सकृत् कृते कृतः शास्त्रार्थः, इति न्यायात् सकृत् प्रवर्तते, उत यावद्भक्तिदार्ढ्यम्? तत्रोच्यते—भक्तिपरिशुद्धिपर्यन्तं तत्प्रवृत्तिरावश्यकी, यथा व्रीहीनवहन्तीत्यनेन विहितव्रीह्यवघातस्य यावद्वैतुष्यमनुष्ठानं शास्त्रार्थः, तथा दृष्टापकारकत्वान्मनोमालिन्यनिरासपर्यन्तं ज्ञानाद्यनुष्ठाने यतनीयमिति ॥ २७ ॥

(१) ब्र. सू० १।१।१।

तेषामङ्गानां यान्यङ्गानि तदनुष्ठानं तु न प्रसज्यत इत्यत्रोत्तरम् ।

तदङ्गानां च (२) ॥ २८ ॥

ब्रह्मज्ञान के हेतुभूत जो श्रवण, मनन, निदिध्यासन आदि साधन हैं उनके अङ्गभूत गुरुशुश्रूषा, शास्त्र-चिन्तन तथा शम, दम आदि साधनों का भी अन्तः-करण की शुद्धि होने तक अनुष्ठान करते रहना चाहिए ॥ २८ ॥

तदङ्गानां गुर्वनुगमनवेदाविरोधितर्कानुसन्धानशमादीनामप्यनुष्ठानं युक्तम् । न ह्यङ्गविकलान्यङ्गानि सैन्यसेनापतिवत् प्रधानोपकाराय क्षमन्ते ॥ २८ ॥

इदानीं बुद्धिविषयपरिशुद्धिश्चिन्त्यते—

तामैश्वर्यपरां काश्यपः परत्वात् (३) ॥ २९ ॥

आचार्य काश्यप का मत है कि बुद्धि एक मात्र परमेश्वर का ही आश्रय लेती है, तभी वह मोक्षदायिनी होती है; क्योंकि वे सभी जीवों से परे हैं। इनके मत में जीवात्मा तथा परमात्मा में सर्वथा भेद है ॥ २९ ॥

तां बुद्धिं परमेश्वरैश्वर्यादिमद्विषयिणीं निःश्रेयसफलां काश्यप आचार्यो मन्यते, कुतः ? जीवात्मभ्यः परत्वात् तैः स्वज्ञानाय परज्ञानस्यापेक्षितत्वात् । एतन्मते जीवब्रह्मणोरत्यन्तं भेद इति ॥ २९ ॥

आत्मैकपरां बादरायणः (४) ॥ ३० ॥

महर्षि बादरायण (व्यासजी) केवल चिद्घन आत्मा का आश्रय लेने वाली बुद्धि को ही मोक्षदायिनी मानते हैं। इनके मत में एक मात्र चित्सत्ता ही परमार्थ वस्तु है। जीवात्मा तथा परमात्मा का भेद कल्पित है, वास्तविक नहीं ॥ ३० ॥

बादरायण आचार्यः पुनः शुद्धात्मविषयिणीमेव मनुते, तथा च सूत्रं—"आत्मेति त्ववगच्छन्ति ग्राहयन्ति च"[१] इति । एतन्मते जीवब्रह्मत्वकल्पनाया मिथ्यात्वाच्छुद्धचिदात्ममात्रबुद्धेस्तत्त्वज्ञानत्वात् तदेव मुक्तिफलायेति ॥ ३० ॥

उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्याम् (५) ॥ ३१ ॥

शाण्डिल्यमुनि वेदवाक्य तथा न्याय के आधार पर जीवात्मा एवं परमात्मा दोनों का आश्रय लेने वाली बुद्धि को मोक्षदायिनी स्वीकार करते हैं ॥ ३१ ॥

शाण्डिल्य आचार्यस्तूभयपरामेव मन्यते, कुतः ? शब्दो हि वेदस्तथा ब्रूते—"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत।" इत्युपक्रम्य "एष

(१) ब्र० सू० ४।१।३ ।

स आत्मान्तर्हृदयमेतद्ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः"[१] इति विचिकित्स्य तदुभयविषयविदो ब्रह्माभिप्रायलक्षणप्रेमभक्तिजन्यब्रह्मसम्भवफलत्वमाह—"बवरः प्रावाहणिरकामयत"[२] इतिवत् पूर्वशाण्डिल्यार्थत्वान्न नित्यानित्यसंयोगविरोधः। वस्तुतो वेदस्य भगवत्कर्तृकत्वमेव। श्रुतेरपि—

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।।[३] इति।

उपपत्तिश्च भवति—ब्रह्म खलु परमैश्वर्यवत्तया श्रुतं जीवस्वरूपतया च। तथा च श्रुतिः—"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीति तद्विजिज्ञासस्व।"[४] तथा

ममैवांशो जीवलोके जीवभूतः सनातनः[५] इति।

तत्र किं कस्योपमर्दकम्। तस्मात्—तत्त्वमस्या[६] दिवाक्येनोभयबोधनमेवोपपत्तिमदिति ॥ ३१ ॥

वैषम्यादसिद्धमिति चेन्नाभिज्ञानवदवैशिष्ट्यात् (६) ॥ ३२ ॥

जीवात्मा तथा परमात्मा दोनों में समानता न होने के कारण बुद्धि उन दोनों का आश्रय लेगी, यह सिद्ध नहीं होता यदि ऐसा कहें तो ठीक नहीं; क्योंकि यह वही है इस प्रत्यभिज्ञा (पहचान) बुद्धि के द्वारा जैसे वह और यही की एकता होती उसी प्रकार जो ब्रह्म है, वही जीव रूप में स्थित है, ऐसी बुद्धि होने से दोनों में विषमता नहीं रहती। शाण्डिल्यमुनि के मन में भी जीव तथा ब्रह्म की एकता ही है।

ननूभयविषयत्वमेव न सिद्ध्यति वैषम्यात्। विषमं हि जगत्कर्तृत्वादिविशिष्टे तदकर्तृत्वादिविशिष्टज्ञानमितिचेन्न; यतः सोऽयं देवदत्तः सोऽहमितिप्रत्यभिज्ञावदेकविशिष्टेऽपरवैशिष्ट्यमन्तरेण सामानाधिकरण्यस्य स्वरूपाभेदांशगोचरकत्वेन तदुपपत्तेः, विशिष्टवैशिष्ट्यबुद्धेरौत्सर्गिकत्वात्। अथ विशेष्यमात्रलक्षणया स्वरूपाभेदोपस्थितिरिति मतं तन्न; लक्षणया बोधस्य जघन्यत्वात्, लक्ष्योपस्थितौ तदवच्छेदकोपस्थितिहेतुसत्त्वाच्च। अन्यथा कदाचिच्छक्यतावच्छेदकमन्तरेणापि शक्यस्मृतिर्भवेदित्यास्तां तावत् ॥ ३२ ॥

(१) छा० उ० ३।१४।१। (२) तै० सं० ७।१।१०।२। (३) ऋग्वेद १०।९०।९।
(४) तै० उ० ३।१। (५) गीता १५।७। (६) छा० उ० ६।८।३।

न च क्लिष्टः परः स्यादनन्तरं विशेषात् (७) ॥ ३३ ॥

ब्रह्म और जीव की एकता मानने पर भी जीवोपाधिधारी आत्मा के जो क्लेश आदि हैं, वे परमेश्वर का स्पर्श नहीं कर सकते; क्योंकि त्रिदंश में अभेद निर्णय के पश्चात् भी क्लेश आदि का सम्बन्ध जीवात्मा से ही है और यही परमात्मा से जीव का अन्तर सिद्ध करता है ॥ ३३ ॥

न चैवं सति जीवोपाधिक्लेशादिमत्त्वमपि परमेश्वरे प्रसज्येतेति वक्तुं शक्यम्, उक्ताभेदबुद्धयनन्तरं क्लेशादेरात्मासम्बन्धित्वरूपविशेषनिर्णयादिति ॥ ३३ ॥

ऐश्वर्यं तथेति चेन्न स्वाभाव्यात् (८) ॥ ३४ ॥

यदि कहें कि परमेश्वर में जैसे क्लेश आदि बाधित होते हैं उसी प्रकार ऐश्वर्य भी बाधित हो सकता है, तो यह ठीक नहीं है; क्योंकि ऐश्वर्य तो ईश्वर का स्वभाव है। अतः उसका बोध नहीं हो सकता ॥ ३४ ॥

नन्वेवं क्लेशादिवदैश्वर्यंकर्तृत्वादिलक्षणं परमेश्वरस्य बाध्यते वैभवं त्वात्मनि प्रतीतत्वात्, न क्लेशादिवदिति चेन्न; कर्तृत्वादेः परमेश्वरस्य स्वाभाव्यात्। न हि वह्नेरुष्णस्वाभाव्यमन्यथा भवति। तस्मादस्वाभाविकत्वमुपाधिरिति। अत एव दर्पणादिप्रतिफलितबिम्बे भास्वति मालिन्यादिबाधेऽपि वृत्तिप्राकाश्यादिस्वभावस्याबाध एवेति ॥ ३४ ॥

ननु परमेश्वरस्य सत्यमैश्वर्यं जीवानां तु कथमागन्तुकः क्लेशादिरित्यत्र हेतुमाह—

अप्रतिषिद्धं परैश्वर्यं तद्भावाच्च नैवमितरेषाम् (९) ॥ ३५ ॥

वेद में कहीं भी परमेश्वर के ऐश्वर्य का निषेध नहीं किया गया है। अपितु उसमें ऐश्वर्य को स्वाभाविक कहा गया है। इसी प्रकार जीव के ब्रह्मभाव का प्रतिपादन होने के कारण उनके लिए भी क्लेश आदि का होना स्वाभाविक नहीं आगन्तुक ही है ॥ ३५ ॥

नहि कस्यामपि श्रुतौ परमेश्वरस्यैश्वर्यं प्रतिषिद्धमस्ति येन प्रतिपन्नमपि बाधितं स्यात्; प्रत्युत—सत्यसङ्कल्प[1] इत्यादिना तस्य स्वाभाव्यमवगम्यते। न च जीवस्येव प्रतीतधर्मत्यागे कारणमस्ति, सदैवेश्वरत्वात्, सदैव मुक्तत्वात्। तदितरेषां तु जीवानां नैवं स्वाभाविकः क्लेशादिः। कस्मात्? तद्भावात्। श्रूयते हि—"परं ज्योतिरुपसम्पद्यते स्वेन रूपेणाभिनिष्पद्यते"[2] इत्यादिभिः। तच्च स्वभावत्वे नोपपद्यते, उपपद्येतापि यदि परस्य क्लेशादिस्वभावः स्यात्। न चैवं तस्माद्

(१) छा० उ० ३।१४।२। (२) छा० उ० ८।१२।२।

ब्रह्मभावलक्षणमुक्त्यन्यथानुपपत्त्यापि जीवानामौपाधिकी संसृतिरिति। यद्यपि परस्यापि मायौपाधिकमैश्वर्यम् तथापि तदुपाधेः कदाचिदपि नात्यन्तलयः। जीवोपाधिबुद्धीनां तु परभक्तौ सत्यामत्यन्तलय एव। न हि भगवतो माया शक्तिः क्षीयते, जीवानामनन्तत्वेन सत्संसारतद्भजनाद्यर्थं भगवतः प्रवृत्तेरावश्यकत्वादिति। एवञ्च—"ध्यायतीव लेलायतीव"[1] इत्यादिश्रुतिः—"अथात आदेशो नेति नेति"[2] इत्यादिश्रुतिश्च जीवविषयिण्येवेति ॥ ३५ ॥

सर्वानृते किमिति चेन्नैवम्बुद्ध्यानन्त्यात् (१०) ॥ ३६ ॥

सब जीवों की क्रमशः मुक्ति होने पर जब सब प्रकार की बुद्धियों का लय हो जाता है, तब परमात्मा की पर उपाधि भी बनी रहने का कोई प्रयोजन न रहने से उसका भी आत्यन्तिक लय हो जायेगा; फिर उनमें स्वाभाविक ऐश्वर्य रहकर क्या होगा? ऐसा कहें तो ठीक नहीं; क्योंकि जीवोपाधिक बुद्धियाँ अनन्त हैं। अतः ऐसा कोई काल नहीं है, जब सभी बुद्धियों का लय हो ॥३६॥

अथ क्रमशो मुक्तावपि यदा सर्वबुद्धीनां विलयस्तदा परोपाधेः स्थितौ प्रयोजनाभावात् तस्याप्यत्यन्तलये किं कृतमैश्वर्यं स्वभाव इति चेन्नैवं भवति; जीवोपाधिबुद्धीनामनन्तत्वात्। तादृशकाल एव नास्तीति युक्तं स्वाभाविकमैश्वर्यम्। न च प्रागभावाः प्रतियोगिजनकास्तत्त्वादित्येतावतापि कालस्तथाभूतः सिद्ध्यति। अथैकदा सर्वे जनितप्रतियोगिन इति चेन्न, अप्रयोजकत्वात्। सर्वकार्यशून्यकालानुमानं त्वत्यन्ततर्कशून्यम्। अन्यथा सर्वे प्रागभावाः कदाचिदजनितप्रतियोगिन इत्यनुमानेन ध्वंसानधिकरणः प्राक्कालः सिद्ध्येत्। अथाहमेवामुक्तः स्यामिति धिया मुक्तावयत्नप्रसङ्ग इति चेत्, फलानिश्चयेऽप्युपायतानिश्चयेन तत्साधने प्रवृत्तिरस्तु। प्रत्युत सर्वमुक्तिनिश्चये तत एवाप्रवृत्तिप्रसङ्ग इति ॥ ३६ ॥

अथोपादानकर्तृत्वलक्षणमैश्वर्यं यदि परस्य साहजिकं तदा विकारित्वमेव प्राप्तं मृदादिवदित्यत उच्यते—

प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनानुवर्तमानात् (११) ॥ ३७ ॥

यदि परमेश्वर में कर्तृत्वरूप ऐश्वर्य मानें तो वह विकारी होगा। इसके उत्तर में कहते हैं कि परमेश्वर प्रकृति = मायाशक्ति को बीच में डालकर सृष्टि करता है अतः जडप्रपञ्च की उपादानभूत प्रकृति में ही विकार है, परमेश्वर तो अविकारी ही है। वह अपनी चित्सत्ता से प्रकृति में अनुगत है। इसी से उसमें कर्तृत्वरूप ऐश्वर्य तो है किन्तु विकृति नहीं है ॥ ३७ ॥

---

(१) बृ० उ० ४।३।७। (२) बृ० उ० २।३।६।

प्रकृतिर्नाम जडकार्यमात्रोपादानम्। सा विकार्या, न तु ब्रह्मस्फुरणरूपसत्तया प्रकृत्यनुगतत्वेन च परस्य कर्तृत्वादि। न च प्रकृतिरेव सत्तेति वक्तुं शक्यते, जीवानामसत्त्वप्रसङ्गात्। तेषां प्रकृतेः परत्वात्। तस्मात् प्रकृतिलक्षणां मायाशक्तिमन्तरालीकृत्य परस्य कर्तृत्वादिस्वाभाव्यमिति न विकार्यता। न हि मायया सृजन् मायावी मायाकार्यो भवतीति। यद्यपि तादात्म्येन कार्यत्वमेव विकार्यत्वम्, तच्च वर्तत एव; तथापि क्षीरादिवन्न स्वरूपपरिवर्तनेन विकारित्वम्। यद्वा स्वाधिकविकाराहेतुत्वेन घटं प्रति दण्डादिवदविकार्यत्वमस्ति। तदेवोक्तं प्रकृत्यन्तरालादिति॥ ३७॥

ननु मायोपादानत्वे मायायामेव जगत् प्रतिष्ठितम्, तर्हि कथम्—"तस्मिन् सर्वं प्रतिष्ठितम्"[१] इति श्रुत्या जगतो ब्रह्मप्रतिष्ठा प्रतिपाद्यत इत्यत्रोत्तरम्।

तत्प्रतिष्ठा गृहपीठवत् (१२)॥ ३८॥

यदि प्रकृति से ही जगत् की सृष्टि होती है तब तो उसी में यह जगत् प्रतिष्ठित है फिर कैसे कहा जाता है कि ब्रह्म में ही समस्त विश्व प्रतिष्ठित हैं—'तस्मिन् सर्वं प्रतिष्ठितम्' (तै० उ० २६) इस आशङ्का के उत्तर में कहते हैं कि प्रकृति का आश्रय भी ब्रह्म ही है। अतः उसमें प्रतिष्ठित जगत् को ब्रह्म में प्रतिष्ठित मानने में कोई आपत्ति नहीं है, जैसे घर में वर्तमान चौकी पर बैठा हुआ मनुष्य घर में बैठा भी माना जाता है॥ ३८॥

तस्मिन् ब्रह्मण्यपि विकारप्रतिष्ठानमविरुद्धं गृहपीठवत्। यथा गृहमध्यस्थपीठे स्थितोऽपि गृहे तिष्ठति पीठे तिष्ठतीति व्यपदिश्यते तद्वत्॥ ३८॥

ननु तर्हि प्रकृत्यैव ब्रह्मान्यथासिद्धमस्तु नेत्युच्यते—

मिथोऽपेक्षणादुभयम् (१३)॥ ३९॥

सृष्टिकार्य में ब्रह्म तथा प्रकृति दोनों एक दूसरे की अपेक्षा रखते हैं। अतः दोनों ही उसके कारण हैं॥ ३९॥

ब्रह्म प्रकृतिश्चोभयमपि कारणम्। परस्परं चेतनाचेतनाभ्यां स्वज्ञानाय स्वशक्तिविषयाय चापेक्षितत्वात्, किं कस्यापेक्षकमिति॥ ३९॥

इदानीं स्वशास्त्रे व्यवहारलाघवाय पदार्थसङ्कलनमुच्यते—

(१) तै० उ० २६।५।

चेत्याचितोर्न तृतीयम् (१४) ॥ ४० ॥

चेत्य और चित् = ज्ञेय-ज्ञातव्यरूप प्रकृति-पुरुष से भिन्न कोई तृतीय पदार्थ विश्व में नहीं है ॥ ४० ॥

चेत्या प्रकृतिः चिद् ब्रह्म तयोर्न तृतीयमर्थान्तरमत्रेत्यर्थः। ननु न तृतीयस्य सिद्धयसिद्धिभ्यां चोद्यत इति चेत्। अयमर्थः ब्रह्मभिन्ने ज्ञातृत्वं प्रकृतिभिन्ने च ज्ञेयत्वं निषिध्यत इति ॥ ४० ॥

अथ प्रकृतिपुरुषयोरसम्बन्धे सर्वकार्यविलोपः, सम्बन्धे तु स एव तृतीय इत्यत आह—

युक्तौ च सम्परायात् (१५) ॥ ४१ ॥

प्रकृति तथा पुरुष = जड और चेतन अनादिकाल से परस्पर संयुक्त हैं— देखिए गीता (१३।१९) ॥ ४१ ॥

मिथ इत्यनुवर्तते। तौ प्रकृतिपुरुषौ बुद्धिस्थौ परस्परं प्रतिसम्बन्धरूपौ, न त्वागन्तुकः कश्चित्, कस्मात्? सम्परायात् अनादित्वादेव। तथा च गीतायाम्— "प्रकृतिं पुरुषं चैव विद्धयनादी उभावपि"[1] इति। अथानादिरेव सम्बन्धान्तर-मस्त्विति चेत्? न जडाजडविकल्पेन तयोरनन्यत्वादिति ॥ ४१ ॥

ननु प्रकृतिर्मिथ्यैव, मायारूपत्वात्, तस्याः—

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।[2]

इत्यादिश्रुतिभ्यः। तथा च कथं वेद्यं पदार्थ इत्यत आह—

शक्तित्वान्नानृतं वेद्यम् ॥ (१६) ४२ ॥

वेद्यज्ञेय प्रकृति माया रूप होने के कारण सर्वथा मिथ्या है, ऐसा नहीं माना जा सकता, क्योंकि वह माया ब्रह्म की शक्ति मानी गयी है ॥ ४२ ॥

वेद्यं प्रधानं नानृतं न मिथ्या भवितुमर्हति, कुतः? शक्तित्वादेव। न हि मायावी मायाशक्तिं विना विहितागन्तुकसृष्टये प्रभवति। किञ्च,—"कुतस्तु खलु सौम्यैवं स्यादसतः सज्जायेत"[3] इति श्रुतिः कार्यसत्त्वेन कारणसत्तां वदन्ती सर्व-सत्तामाह, नानृतत्वम्। अस्ति तु सर्वदा भागवती सृष्टिः सादृश्यसहकार्यपेक्षा चेतनकृतसृष्टित्वान्मायिकसृष्टिवदिति। न चादृष्टादिभिरर्थान्तरम्, एकशक्त्यपेक्षायां लाघवाद्भोगतत्साधनेतरेष्वदृष्टहेतुतायां मानाभावात्। एवं सर्वकार्येषु मिथो व्यभि-चारादेकनित्यसहकारिशक्तिसिद्धिः। तदवान्तरानेककल्पनं तु फलमुखमिति न गौरवायेति। विस्तरोऽस्यैव तृतीय इति ॥ ४२ ॥

(१) गीता १३।१९। (२) श्वेताश्व ३.४।१०। (३) छा० उ० ६।२।२।

गता प्रासङ्गिकी चर्चा प्रकृतमनुसरति—

तत्परिशुद्धिश्च गम्या लोकवल्लिङ्गेभ्यः (१७) ॥ ४३ ॥

भक्ति की परिशुद्धि=निर्मलता का ज्ञान लौकिक प्रेम के समान बाह्य-चिह्नों से होता है। जैसे लोक में प्रियतम की चर्चा से प्रिया को पुलक आदि होते देख उसके आन्तरिक प्रेम की पहचान हो जाती है वैसे ही भगवान् के कथाश्रवण, नामसङ्कीर्तन, आदि में रोमाञ्च-अश्रुपात आदि चिह्न देखकर विशुद्ध एवं दृढ़ भक्ति का अनुमान किया जा सकता है ॥ ४३ ॥

यद्यपि जानामीच्छामीत्यादिवदहं भजे, अनुरज्ये इत्येवमादिना प्रत्यक्षगम्यैव भक्तिः, तथापि तस्या दृढतरसंस्कारवैशिष्ट्यलक्षणा परिशुद्धिर्न प्रत्यक्षतो निर्णेतुं शक्यते ज्ञानप्रामाण्यवत्। तस्मात् तन्निर्णयो लोकवज्जातलिङ्गेभ्य एव। यथा लोकेऽनुरागतारतम्यं तत्कथादावश्रुपुलकादिविकारैरनुमीयते तद्वदिति ॥ ४२ ॥

न केवलं लोकवल्लिङ्गानि भवन्ति, महर्षीणां स्मृतिभ्योऽपि तानि लिङ्गानि बाहुल्येन लक्ष्यन्त इत्याह—

सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनि च स्मरणेभ्यो बाहुल्यात् (१८) ॥ ४४ ॥

अर्जुन के समान भगवान् के प्रति सम्मान की बुद्धि, इक्ष्वाकु के समान भगवान् के नाम एवं वर्ण के प्रति अधिक आदर, विदुर के समान भगवान् एवं उनके भक्तों के दर्शन से प्रेम, गोपियों के समान भगवान् के विरह की अनुभूति उपमन्यु के समान भगवद्भिन्न वस्तुओं से स्वभावतः अरुचि, भीष्म-व्यास आदि के समान निरन्तर भगवन्महिमा का वर्णन, व्रजवासियों तथा हनुमान्‌जी के समान भगवदर्थ जीवन धारण करना, बलि के समान भगवान् को सर्वस्व समर्पण कर देना, प्रह्लाद के समान सब में भगवद्भाव रखना, भीष्म, युधिष्ठिर के समान कभी भगवान् के प्रतिकूल आचरण न करना—इत्यादि अनेक भक्ति-सूचक चिह्न स्मृति-इतिहास-पुराणों के वर्णनों में परिलक्षित होते हैं ॥ ४४ ॥

यथार्जुनस्य सम्मानम्—

प्रत्युत्थानं तु कृष्णस्य सर्वावस्थो धनञ्जयः।
न लङ्घयति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा ॥

बहुमानं यथा इक्ष्वाकोः।

पक्षपातेन तन्नाम्नि मृगे पद्मे च तादृशि ।
बभार मेघे तद्वर्णे बहुमानमति नृपः ॥

प्रीतिर्यथा विदुरस्य—

'या प्रीतिः पुण्डरीकाक्ष तवागमनकारणात् ।
सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम् ॥[1]

विरहो यथा गोपीनाम्—

गुरूणामग्रतो वक्तुं किं ब्रवीमि न नः क्षमम् ।
गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना ॥[2]

इतरविचिकित्सा यथा श्वेतद्वीपनिवासिनाम् । नारददर्शनेऽपि विघ्नबुद्धिर्यथा चोपमन्योः—

अपि कीटः पतङ्गो वा भवेयं शङ्कराज्ञया ।
न तु शक्र त्वया दत्तं त्रैलोक्यमपि कामये ॥[3]

महिमवृद्धौ यथा यमस्य—

नरके पच्यमानस्तु यमेन परिभाषितः ।
किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ॥[4]

स्वपुरुषमभिवीक्ष्य पाशहस्तम्
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥[5]

तदर्थप्राणस्थितिर्यथा हनूमतस्तेनैवोक्तम्—

यावत् तव कथा लोके विचरिष्यति पावनी ।
तावत् स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन् ॥[6]

अथवा कृतकृत्यानामपि नारदादीनां तदेकाराधनार्थं प्राणधारणम् । अत एव श्रुतिः—"यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च"[7] इति ॥

तदीयताभावस्तु वसोरुपरिचरस्य—

---

(१) म० भा० उ० प० ८९।२४ । (२) वि० पु० ५।१८।१७ । (३) म० भा० अ० प० १०।१ ।
(४) वि० पु० ३।७।१० । (५) श्रीमद्भागवत । (६) वा० रा० उ० का० १०८।३५ ।
(७) नृ० ता० उ० ६ ।

आत्मराज्यं धनं चैव कलत्रं वाहनं तथा ।
एतद्भागवतं सर्वमिति तत् प्रेक्षते सदा ॥[1] इति ।

सर्वभूतेषु तद्भावो यथा प्रह्लादस्य प्रसिद्धः, उक्तञ्च तेनैव—

एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ।
कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥[2]

तस्मिन्नप्रातिकूल्यं यथा हन्तुमागतेऽपि भगवति भीष्मस्य । तेनैवोक्तम्—

एह्येहि देवेश जगन्निवास नमोऽस्तु ते शार्ङ्गगदासिपाणे ।
प्रसह्य मां पातय लोकनाथ रथादुदग्राद्भुतशौर्यसंख्ये ॥[3]

आदिशब्दादुद्धवाक्रूरादिचेष्टितान्यपि द्रष्टव्यानि । यद्यपि द्वेषविपक्षभावादित्यत्रेदमुक्तम्, तथापि तत्र रागलिङ्गत्वेनात्र च बहुभक्तिपरिशुद्धिलिङ्गतयेति विशेष इति ॥ ४४ ॥

ननु स्वामिन्यनुरागिणां तदनुग्रहतारतम्यवत्सु द्वेषेर्ष्यादयो भवन्ति, तेऽपि किं लिङ्गानि ? नेत्याह—

द्वेषादयस्तु नैवम् (१०) ॥ ४५ ॥

स्वामी के प्रति अनुराग रखनेवाले सेवकों में स्वामी के अनुग्रह की न्यूनता या अधिकता होनेपर उसके प्रति द्वेष, ईर्ष्या आदि भाव भी प्रगट होते हैं; क्या ये भी प्रेम या भक्ति के चिह्न हो सकते हैं ? नहीं, भगवान् के भक्तों में इस प्रकार के द्वेष आदि नहीं प्रगट होते । देखिए महाभारत अनुशासनपर्व—१४०,१३५ ॥ ४५ ॥

तदसम्भवादेव । यथोक्तं भगवता द्वैपायनेन—

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥[4] इति ।

शिशुपालस्य तु द्वेषात् स्मरणं ततः परा भक्तिस्ततो मुक्तिरित्येव क्रम इति ॥ ४५ ॥

अथ प्रायशो भगवदवतारविषयाण्येव तानि लिङ्गानि स्मर्यन्ते ब्रह्मज्ञानजन्यत्वात् पूर्णविषयता च भक्तेर्युक्तेत्यत्र सिद्धान्तमाह—

---

(१) म० भा० शा० प० ३३६।२३ । (२) वि० पु० १।१६।५ । (३) म० भा० भी० प० ५५।९४। (२) म० भा० अनु० प० १४९।१३३ ।

तद्वाक्यशेषात् प्रादुर्भावेष्वपि सा (२०) ॥ ४६ ॥

भगवान् के अवतारों के प्रति जो भक्ति होती है वह पराभक्ति ही है। गीता में भगवान् श्रीकृष्ण ने पहले देव भक्तों को देवताओं की प्राप्ति बतलाकर अन्त में अपने भक्तों को अपनी प्राप्ति बतलायी है—

देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि। (७।२३) ॥ ४६ ॥

सा परा भक्तिः प्रादुर्भावात्मविषयाऽपि भवति, कस्मादिदं ज्ञायते? वाक्यशेषात्—

देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि।[1] इति।

प्रतिज्ञातार्थस्थिरीकरणाय देवतान्तरभक्तिनिन्दायां वाक्यशेषो भवति—

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥[2] इति।

तत्र यो यो यां यां भक्त इत्येतावदुक्तार्थसिद्धौ तनुपर्यन्तनिर्देशाद्भक्तेस्तत्त्वात्मविषयत्वे तात्पर्यमुन्नीयते। प्रकरणञ्च भक्तेरेवेति ॥ ४६ ॥

जन्मकर्मविदश्चाजन्मशब्दात् (२१) ॥ ४७ ॥

भगवान् के जन्म-कर्म का रहस्य जानने वाले व्यक्ति का भी जन्म नहीं होता है, ऐसा भगवान् श्रीकृष्ण ने (गीता ४।८) में स्वयं कहा है ॥ ४७ ॥

जन्म शरीराविनाभूतवेदप्रणयनदैत्यवधभक्तदर्शनादिकार्याय भगवतः शरीरपरिग्रहः, कर्म च वेदप्रणयनादि। तत्त्ववेदिनो जन्माभावफलाय भवति। यथाह—

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥[3] इति।

न च जन्मकर्मवेदनस्य साक्षादमृतत्वफलमुपपद्यते, किन्तु तद्गतमनोमालिन्यनिवृत्तिद्वारा तद्विशिष्टपरमेश्वरगोचरपरभक्तिं जनयित्वा जन्मभावफलाय भवति। तस्मात् प्रादुर्भावापन्नगोचरत्वं परभक्तेः शब्दादेवावगम्यत इति ॥ ४७ ॥

तच्च दिव्यं स्वशक्तिमात्रोद्भवात् (२२) ॥ ४८ ॥

भगवान् का जन्म और कर्म दिव्य हैं, जीवशरीर के समान कर्मफल के अधीन तथा पञ्चभूतों से निर्मित नहीं है; क्योंकि वह भगवान् की योगमाया

(१) गीता ७।२३। (२) गीता ७।२१। (३) गीता ४।९।

द्वारा प्रगट हुआ है अतः अप्राकृत एवं चिन्मय है। अहङ्कार तथा फलासक्ति से रहित होने के कारण उनका प्रत्येक कर्म भी दिव्य है ॥ ४८ ॥

"जन्म कर्म च मे दिव्यम्"[1] इत्यत्र किं दिव्यत्वं न धर्मजत्वम्, धर्मयोगाभावात् तस्मिन्नदृष्टासिद्धेः। नापि दिवि भवत्वं भूलोकजन्मन्यव्याप्तेः। किन्तु जीवशरीरवन्न भूतोपादानकत्वम्; अपितु स्वमायाशक्तिकृतत्वम्। अत एव मोक्षधर्मे नारदं प्रति भगवद्वाक्यम्—

मायैषा हि मया सृष्टा यन्मां पश्यसि नारद।[2] इति।

तथा च गीयते—

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवामि युगे युगे॥[3] इति।

न चाभौतिकत्वे शरीरत्वव्याघातः भोगायतने भौतिकत्वनियमात्। अथ भोगायतनत्वमेव शरीरत्वमिति चेत्? न; चेष्टाश्रयत्वस्य तत्त्वे लाघवात्। चेष्टात्वं तु क्रियागतो जातिविशेषः। न च क्रियैव चेष्टा; मृतशरीरक्रियायां तद्व्यवहारापत्तेः। नापि साक्षात् प्रयत्नजक्रियात्वमेव चेष्टात्वम्; घटादावपि चेष्टत इति व्यवहृतिप्रसङ्गात्, सर्वक्रियायाः साक्षात् परमेश्वरयत्नजन्यत्वात्। एवञ्च परमेश्वरशरीरबोधकमानेन तच्छरीरचेष्टासिद्धिरित्यास्तां तावदिति। न च तत्त्वाधिक्यं तच्छरीरस्य ब्रह्माण्डानुपादानतया घटादिवदतत्त्वभावात्, इन्द्रियाप्रकृतित्वाच्च॥ ४८॥

ननु स्वतः प्रयोजनाभावे कथं प्रवर्तत इत्यपेक्षायामाह—

मुख्यं तस्य हि कारुण्यम् (२३) ॥ ४९ ॥

भगवान् के जन्म ग्रहण में जीवों के प्रति उनकी अहैतुकी कृपा ही मुख्य कारण है॥ ४९ ॥

लोके हि निरुपाधिपरदुःखहानाय प्रवृत्तेषु कारुणिकव्यपदेशः। न चासौ तेषु मुख्यः कृपाजन्यदुःखहानाय पुण्यार्थं वाप्यन्ततः प्रवृत्तेर्न निरुपाधित्वं सम्भवति। नापि परदुःखप्रहाणमात्रप्रवृत्ते तथा धनाद्युपाधियुक्ते तदव्यवहृतेः। किन्तु निरुपाधिपरक्लेशनाशिनो भगवत एव मुख्यं कारुण्यम्। तत्कृत एवान्यप्रयोजनार्थिषु कारुण्यव्यवहारो गौण इति। तस्माद् जननीयादृष्टमपेक्ष्य स्वकारुण्यात् प्रवृत्तिरिति॥४९॥

ननु "नराणां च नराधिपम्"[4] इत्यादिना विभूतीनामपि भगवद्रूपत्वकथनाद्राजादिभक्तेरपि मुक्तिः स्यादित्यत आह—

---

(१) गीता ४।९। (२) म० भा० शा० प० ३३९।४५। (३) गीता ४।६। (४) गीता १०।२७।

प्राणित्वान्न विभूतिषु (२४) ॥ ५० ॥

'नराणां च नराधिपम्' १०.२७ (मनुष्यों में मैं राजा हूँ) इस गीता वचन के अनुसार राजा आदि विभूतियों को भगवद्रूप कहा गया है। अतः उनके प्रति की गयी भक्ति भी मोक्ष देनेवाली होनी चाहिए इस शङ्का का समाधान किया गया है कि विभूतियों के प्रति की हुई भक्ति पराभक्ति नहीं है वह पराभक्ति का साधनमात्र हो सकती है; क्योंकि वे प्राणधारी जीव हैं। जीवोपाधि से रहित परमेश्वर विषयक भक्ति ही परा भक्ति कहलाती है ॥ ५० ॥

जीवोपाध्यनवच्छिन्नविषयैव परा भक्तिः, न तु प्राणादिजीवोपाधियुक्तेषु राजादिषु रतिर्मुक्तिफलेति ॥ ५० ॥

द्यूतराजसेवयोः प्रतिषेधाच्च (२५) ॥ ५१ ॥

वेद, स्मृति तथा पुराणों में द्यूतसेवन और राजा की सेवा का निषेध किया गया है। इसलिए भी वे पराभक्ति के आश्रय नहीं सिद्ध होते। यदि वे ईश्वर रूप से उपासनीय माने गये होते तो उनकी सेवा का निषेध नहीं किया गया होता ॥ ५१ ॥

धर्मशास्त्रेषु द्यूतराजसेवयोः प्रतिषेधः स्मर्यते, परमेश्वरत्वे तु तन्न स्यादिति ॥ ५१ ॥

वासुदेवेऽपीति चेन्नाकारमात्रत्वात् (२६) ॥ ५२ ॥

यदि कहा जाय कि गीता में वासुदेव की भी तो विभूतियों में गणना है (वृष्णीनां वासुदेवोऽस्मि—१०।३७) अतः राजाओं के समान वे भी भजनीय नहीं सिद्ध होंगे तो ऐसा मानना ठीक नहीं है; क्योंकि भगवान् श्रीकृष्ण वहाँ आकारमात्र से ही वासुदेव पुत्र तथा मनुष्य हैं—

अन्ये चांशकलाः सर्वे कृष्णस्तु भगवान् स्वयम् ॥ श्री० भा० १।१।२८

ननु "वृष्णीनां वासुदेवोऽस्मि"[1] इति विभूतिषु श्रुतिस्तथा च राजादिवत् सोऽप्यभजनीय एव ? न स्यादिति चेत् परब्रह्मण एव कृष्णाकारमात्रत्वात्। यथा पराशर आह—

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते।
यत्रावतीर्णं विष्णवाख्यं परब्रह्म नराकृति ॥[2] इति।

जीवत्वे तन्न स्यादिति ॥ ५२ ॥

---

(१) गीता २०।३७। (२) वि० पु० ४।११।२।

प्रत्यभिज्ञानाच्च (२७) ॥ ५३ ॥

भगवान् वासुदेव (श्रीकृष्ण) की विष्णुरूपता के विषय में प्रत्यभिज्ञा (पूर्वानुभवस्मृति) उपलब्ध होती है। मार्कण्डेयमुनि महाभारत में युधिष्ठिर से कहते हैं—धर्मराज, मैंने प्रलयकाल में जिन कमलनयन बालमुकुन्द का दर्शन किया था वे ही आपके सम्बन्धी भगवान् श्रीकृष्ण हैं। देखिए वनपर्व १८९।५२ ॥ ५३ ॥

वासुदेवविषये परब्रह्मप्रत्यभिज्ञा च श्रूयते नारायणोपनिषदि—

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः।
ब्रह्मण्यः पुण्डरीकाक्षः ब्रह्मण्यो विष्णुरच्युतः ॥[1]

सर्वभूतस्थमेकं नारायणं कारणरूपमकारणं परब्रह्मस्वरूपमिति। स्मर्यते च प्रत्यभिज्ञा यथा प्रलये दृष्टानुभावेन युधिष्ठिरं प्रति मार्कण्डेयेनोक्तम्—

यः स देवो मया दृष्टः पुरा पद्मायतेक्षणः।
स एव पुरुषव्याघ्रः सम्बन्धी ते जनार्दनः ॥[2] इति।

तथा "तपोभिरप्यदृश्यो हि भगवान्" इति श्रुत्वा जनमेजयेनाभिहितम्—

तपसाऽप्यसुदृश्यो हि भगवान् लोकपूजितः।
तं दृष्टवन्तस्ते साक्षात् श्रीवत्साङ्कविभूषणम् ॥[3] इति।

चकारात् तद्भक्तेषु फलस्मरणलिङ्गात् ॥ ५३ ॥

तर्हि कथं विभूतिषु तत्कीर्तनं तत्राह—

वृष्णिषु श्रैष्ठ्येन तत् (२८) ॥ ५४ ॥

भगवान् श्रीकृष्ण यदुवंशियों में सर्वश्रेष्ठ हैं, यही बताने के लिए विभूति-वर्णन के प्रसङ्ग में वासुदेव का नाम लिया गया है। जैसे द्वादश आदित्यों में भगवान् विष्णु को विभूति कहा गया है (आदित्यानामहं विष्णुः १०।२१) किन्तु वे विभूति मात्र नहीं हैं। साक्षात् परमेश्वर भी हैं ॥ ५४ ॥

"आदित्यानामहं विष्णुः"[4] इत्यादौ तेषु श्रेष्ठत्वं परमेश्वरस्यैवेति दृष्टिमात्रार्थं विभूतिकथनम्, तच्च वासुदेवेऽपि वृष्णिषु श्रेष्ठोऽयमित्येतावन्मात्रदृष्टिविधानार्थं विभूतिषु वासुदेवकीर्तनमिति ॥ ५४ ॥

(१) ना० उ० ४। (२) म० भा० व० प० १८९।५२। (३) म० भा० व० प० ३३३।२२। (४) गीता १०।२१।

एवं प्रसिद्धेषु च (२९)॥ ५५ ॥

इसी प्रकार विष्णु रूप से प्रसिद्ध जो वामन, श्रीराम आदि अवतार हैं उनके प्रति की हुई भक्ति भी मुक्तिरागिनी पराभक्ति ही है ॥ ५५ ॥

एवमनेन प्रकारेण वासुदेववद् ब्रह्मलिङ्गवत्तया प्रसिद्धेषु वराहनृसिंहवामनराम-भद्रादिषु भक्तिरपि मुक्तिफलेति बोध्यम् । यद्वा एवं ब्रह्मलिङ्गवत्तया प्रसिद्धेषु— "रुद्राणां शङ्करश्चास्मि"[1] इत्यादिविभूत्यात्मसु श्रैष्ठ्यमात्रदृष्टिर्मन्तव्या । उक्तं हि स्कान्दे—

विष्णुरुद्रान्तरं ब्रूयाद्यः श्रीगौर्यन्तरं तथा ।
तद्भ्रान्तिकस्य मूर्खस्य वाक्यं शास्त्रविगर्हितम् ॥[2] इति ।

शङ्करस्य ब्रह्मलिङ्गप्रसिद्धिः स्मृत्यादौ बहुलमुपलभ्यत इति ॥ ५५ ॥

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यभक्तिसूत्रभाष्ये
द्वितीयाध्यायस्य प्रथममाह्निकम् ॥ १ ॥

—:o:—

द्वितीयाध्याये द्वितीयाह्निकम्

उक्तौ दृष्टोपकारकौ ज्ञानयोगौ सम्प्रति प्रतिबन्धकदुरितक्षयमुखेनापवर्गवत्यो गौणभक्तय उच्यन्ते—

भक्त्या भजनोपसंहाराद् गौण्या परायै तद्धेतुत्वात् (१) ॥ ५६ ॥

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥—९।१४

इत्यादि गीता वचनों में भक्तिपद से भजन का उपसंहार होने के कारण वहाँ गौणी भक्ति से ही तात्पर्य है; क्योंकि गौणी भक्ति पराभक्ति की प्राप्ति में हेतु है ॥ ५६ ॥

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ।[3]

इत्यनेन सप्तमाध्यायप्रतिपादितपरभक्तिमनूद्य तत्पश्चाद्गीतम्—

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥[4] १ ॥

---

(१) गीता १०।२३ । (२) काशीखण्ड २७।१८१ । (३) गीता ९।१३ । (४) गीता ९।१४ ।

इत्यादि । तत्पश्चात्—

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।[१] इति ।

तदुपसंहारस्ततस्तत्र "चित्रया यजेत"[२] इतिवत् सामानाधिकरण्येन भक्ति-नाम्ना भजनेन फलं भावयेदित्यर्थः । "एकभक्तिर्विशिष्यते"[३] इत्यादौ भगवद्भक्तौ भक्तिशब्दस्य प्रयुक्तत्वेन संज्ञाप्राप्तेः, भक्तिभजनयोरेकार्थत्वाच्च । नाप्यत्र परभक्तिः फलभावनया विधीयते, तस्या अकृतिसाध्यत्वेनाविधेयत्वात् । न चापि तस्या निःश्रेयसहेतुत्वमज्ञातं ज्ञाप्यते—"मद्भक्ता यान्ति मामपि"[४] इत्यादिना सप्तम एव तज्ज्ञापनस्यापि प्राप्तत्वात् । किन्तु परभक्तेर्विघ्ननाशनसाधनाकाङ्क्षया कीर्तना-दिकमेवोपक्रान्तं भक्तिशब्देन गौण्या वृत्त्या तृतीयान्तेन निर्दिश्य परभजनसाधनत्वं तेषु विधीयते इत्यत्रार्थवादाकाङ्क्षायाम्—"मयि ते तेषु चाप्यहम्,"[५] इति पश्चा-दन्वयः । अन्यथा भक्त्या भजनं तेन च मयि स्थितिरिति वाक्यं भिद्येत । कीर्तनादिषु भक्तिसाधनत्वेन "आयुर्वै घृतम्"[६] इतिवद्भक्तिशब्दो गौणः शक्यसंस्कारेण सुग्रह इति । यद्वा भज्यते एभिरिति व्युत्पत्त्या तासु भक्तिशब्दः उद्भिद्वत् ।[७] अथवा "चतुर्विधा भजन्ते माम्"[८] इति भजनगणपाठात् सृष्टिवत् । "उदाराः सर्व एवैते"[९] इत्यौदार्यगुणयोगाद्वा गौणत्वमिति ॥ ५६ ॥

रागार्थं प्रकीर्तिसाहचर्याच्चेतरेषाम् (२) ॥ ५७ ॥

कीर्तन से भगवान् के प्रति अनुराग उत्पन्न होता है जिस प्रकार कीर्तन अनुराग में हेतु है उसी प्रकार उसके साहचर्य से भगवन्नाम-श्रवण-वन्दन आदि जो अन्य भजन प्रकार हैं, वे भी अनुरागरूपा पराभक्ति की प्राप्ति कराने वाले हैं ॥ ५७ ॥

एवं हि श्रुतम्—

स्थाने हृषीकेश तव प्रकीर्त्या
जगत् प्रहृष्यत्यनुरज्यते च । इति ।

तत्र साक्षादेवानुरागार्थत्वं कीर्तनस्य श्रुतम् । तत्साहचर्यात्—

---

(१) गीता ९।२९ । (२) तै० सं० २।४।६ । (३) गीता ७।१७ । (४) गीता ७।२३ ।
(५) गीता ९।२९ । (६) तै० सं० २।३।२ । (७) आ० श्रौ० सू० ९।८ । (८) गीता ७।१६ ।
(९) गीता ७।१८ ।

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।[1]

इत्यादिनोक्तानामपि तदेव फलमिति ॥ ५७ ॥

अन्तराले तु शेषाः स्युरुपास्त्यादौ च काण्डत्वात् (२) ॥ ५८ ॥

गीता के नवें अध्याय में जो कीर्तन, यजन, व्रत, दान, ध्यान, याग, सर्वकर्मार्पण आदि शेष गौणी भक्तियों का श्रवण होता है वे सभी पराभक्ति के ही अङ्गभूत हैं। इतना ही नहीं मनोब्रह्मेत्युपासीत (छा० उ० ३।१८) इत्यादि वचनों द्वारा उपासना आदि में गृहीत जो साधन हैं वे भी पराभक्ति के अङ्ग हैं; क्योंकि सम्पूर्ण ब्रह्मकाण्ड भक्ति और उसके साधनों का प्रतिपादक ही है ॥ ५८ ॥

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ।[2]
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।[3]

इत्येतयोरन्तराले या गौणभक्तयः श्रुतास्ताः परभक्त्यङ्गानि भवन्ति, परभक्तिसन्दंशादेवेति भावः। ता यथा—

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥
ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥[4]

तथा—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥[5]

तथा—

यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥[6]

---

(१) गीता ९।१४। (२) गीता ९।१३। (३) गीता ९।२९। (४) गीता ९।१४,१५। (५) गीता ९।२२। (६) गीता ९।२५,२६।

तथा—

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।[1]

तत्र नाम्नामभिधानं कीर्तनम् । भक्त्यर्थं यत्नश्चात्र लौकिकोऽप्यङ्गता-प्रस्तावादुक्तः । दृढव्रतत्वं मद्भक्त्यर्थैकादश्युपवासाद्यनुष्ठानम् । नमस्कारः स्वापकर्ष-बोधककरशिरःसंयोगादिव्यापारः । ज्ञानयज्ञश्च द्विधा—मुख्यामुख्यभेदेन, एकत्व-पृथक्त्वविषयतया । तन्मात्रचिन्ता तु ध्यानमनुस्मृतिश्च । यागः पूजा भगवन्त-मुद्दिश्य पत्रादिदानञ्च, तथा विहितनिषिद्धसर्वकर्मणां परमेश्वरे समर्पणमिति । न केवलमेतान्येवाङ्गानि, किन्तु "मनो ब्रह्मेत्युपासीत,"[2] "आदित्यानामहं विष्णुः"[3] इत्याद्युपासनादिशब्दकबलीकृतान्यपि भक्तिसाधनानि, कुतः ? ब्रह्मकाण्डस्य सर्वस्यापि भक्तितत्साधनप्रतिपादकत्वादिति ॥ ५८ ॥

ताभ्यः पावित्र्यमुपक्रमात् (४) ॥ ५९ ॥

गौणी भक्तियों द्वारा पवित्रता (पापक्षयपूर्वक अन्तःकरण की शुद्धि) होती है; क्योंकि गीता के नवें अध्याय के आरम्भ में पवित्रमिदमुत्तमम् ९।२ कह कर इन सबको पवित्र बताया गया है ॥ ५९ ॥

ताभ्यो गौणभक्तिभ्यः पावित्र्यमन्तःकरणमालिन्यहेतुदुरितक्षयः, स एव द्वारम्, कुतः ? "पवित्रमिदमुत्तमम्"[4] इत्युपक्रम्याभिधानात्, भक्तेरन्तःकरणधर्मत्वात् पावित्र्यस्यान्तरङ्गत्वादिति ॥ ५९ ॥

तासु प्रधानयोगात् फलाधिक्यमेके (५) ॥ ६० ॥

किन्हीं आचार्यों का मत है कि कीर्तन आदि साधनों में जो प्रधान भक्ति का योग बताया गया है, उससे सिद्ध होता है कि परा भक्ति से युक्त मानव यदि कीर्तन, वन्दन आदि करे तो अधिक फल प्राप्त होता है ॥ ६० ॥

तास्वेव कीर्तनादिषु—"यो मे भक्त्या प्रयच्छति,"[5] "नमस्यन्तश्च मां भक्त्या"[6] इत्यादौ प्रकरणादिसिद्धाङ्गभावेषु पुनर्भक्तिसंयोगकथनं प्रवृत्तभक्तीनां तदनुष्ठाने फलाधिक्यार्थमेवेत्येक आचार्या मन्यन्ते ॥ ६० ॥

(१) गीता ९।२८ । (२) छा० उ० ३।१८।१ । (३) गीता १०।२१ । (४) गीता ९।२ ।
(५) गीता ९।२५ । (६) गीता ९।१४ ।

नाम्नेति जैमिनिः सम्भवात् (६) ॥ ६१ ॥

आचार्य जैमिनि का मत है कि भक्ति का नामतः प्रयोग होने से सामानाधिकरण समन्वय सम्भव है। अतः भक्तिपूर्वक कीर्तन से परा भक्ति प्राप्त करे; इतना ही अभिप्राय है। उससे अधिक फल की कल्पना नहीं करनी चाहिए ॥ ६१ ॥

जैमिनिराचार्यस्तु तासु गौणत्वसिद्धेः "श्येनेनाभिचरन् यजेत"[१] इत्यादाविव भक्त्या कीर्तनेन भक्त्या दानेन परभक्तिं साधयेदिति सामानाधिकरण्यसम्भवान्नामभावेनान्यार्थं तां मन्यते न फलान्तरार्थं गौरवादिति ॥ ६१ ॥

अत्राङ्गप्रयोगाणां यथाकालसम्भवो गृहादिवत् (७) ॥ ६२ ॥

यहाँ पराभक्ति के साधनभूत श्रवण, कीर्तन आदि अनुष्ठान यथासमय सम्भव हैं; जैसे गृहनिर्माण करने के निमित्त यथासमय तृण, काष्ठ आदि का संग्रह किया जाता है। जैसे पहले तृण का संग्रह किया जाय या काष्ठ का इसमें आग्रह नहीं वैसे ही प्रथम कीर्तन किया जाय या श्रवण इसका आग्रह न कर जब जो सम्भव हो वही करना चाहिए ॥ ६२ ॥

कीर्तननमस्यादीनां सहानुष्ठानमेकैकेन वा क्रमेण वाऽनुष्ठानमिति त्रयः पक्षाः। तत्राद्ये कस्यचिदननुष्ठानेऽप्यन्येषां निष्फलत्वप्रसङ्गः; द्वितीये विकल्पप्रासावर्थैक्यनियमः स्यात्; तृतीयस्त्वशास्त्रार्थः। एककृतावन्यस्याननुष्ठानं च प्रसज्यते गौरवात्। तस्मादेतेषां मिथो व्यभिचारहेतुत्वमिति पूर्वपक्षः, सिद्धान्तस्तु सर्वाण्येव साधनानि, प्रमाणसत्त्वात्, किन्तु सहानुष्ठाननियमो नास्ति, प्रमाणाभावात्। येषां तु गन्धपुष्पधूपदीपनैवेद्यादीनामेकप्रयोगश्रवणं तेषामेव सहानुष्ठानम्। तदितरेषां तु यथाकालं यथासम्भवमनुष्ठानं गृहकृत्यादाविव यथा गृहसाधनतृणस्तम्भाद्याहरणं कदाचिदेकदा, कदाचित् क्रमश इति न ह्येतावता तृणादीनामकारणत्वमायाति। तस्माद् यद्यादृशदुरितक्षयसमर्थं तत् तादृशदुरितक्षयं कृत्वा सर्वैः स्वस्वसामर्थ्ये दर्शिते परभक्तिसिद्धिरिति। तथा च गीयते—

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।[२] इति ॥ ६२ ॥

ईश्वरतुष्टेरेकोऽपि बली (८) ॥ ६३ ॥

कीर्तन आदि साधनों में एक का भी विशेष रूप से अनुष्ठान करने पर वही ईश्वर को सन्तुष्ट कर बलवान् (पराभक्ति की प्राप्ति करने में समर्थ) हो जाता है ॥ ६३ ॥

---

(१) आ० श्रौ० सू० ९।७। (२) गीता ७।१९।

तेषु मध्ये यः कश्चिदतिशयानुष्ठानेन बलवान् भवति, स एकोऽपि परमेश्वरतुष्टिं जनयित्वा परभक्त्ये प्रभवति बहुतरशिथिलपरिचर्याभिरपि यथा नेतरः प्रभुस्तुष्यति तुष्यति चैकेनापि निर्व्यलीकसततकृतपादसंवाहनेन तद्वत्। कीर्तनाद्यन्यतमेनापि दृढतरसेवितेन भगवत्प्रसादाद्भक्तिः प्राप्यते, यथा—

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।
बुद्धियोगं समाश्रित्य मच्चित्तः सततं भव।
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि ॥[1] इत्यादि।

तथा कालादिकृतमपि कस्यचिद्बलम्। यथा—

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥[2]

इत्यादिकम्। न च व्यभिचारो बलवत् प्रत्येकजन्यभक्तिं प्रति कीर्तनत्वादिना हेतुत्वादिति ॥ ६३ ॥

ननु कीर्तनाद्यान्तरालिकानां सर्वेषामेव पावित्र्यं द्वारम्? उत केषाञ्चिदन्यदपीत्यत आह—

अबन्धोऽर्पणस्य मुखम् (९) ॥ ६४ ॥

भगवान् को समर्पित किया हुआ कर्म अपना शुभाशुभ फल देने में असमर्थ होने के कारण बन्धन कारक नहीं होता। उसकी अबन्धकता ही पराभक्ति की प्राप्ति का द्वार है ॥ ६४ ॥

भगवत्यर्पितशुभाशुभकर्मणां स्वफलाजननलक्षणबन्धाभाव एव द्वारम्। यथोक्तम्—

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः।[3] इति।

अर्पणमन्त्रोऽपि पुराणान्तरे—

कामतोऽकामतो वापि यत् करोमि शुभाशुभम्।
तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम् ॥ इति।

न चैवं स्वातन्त्र्यप्रसङ्गः; तत्करणबलेन पापाचरणाभावस्यापि तदङ्गत्वात्। यथा स्मृतिः—"न वेदबलमाश्रित्य पापकर्मरतिर्भवेत्" इति। तस्मात् पावित्र्यं तदितरविषयमेवेति। अत्र शुभं कर्म स्वाश्रमविहितनित्यनैमित्तिकात्मकं बोध्यम्। सम्यगाश्रमपरिपालनाद् ब्रह्मलोकादिफलं तत्प्राप्तौ मुक्तये विलम्बः स्यादित्यादिबन्धः,

(१) गीता १८।५७। (२) ब्र० पु० ६७।१६६। (३) गीता ९।२८।

ब्रह्मण्यर्पिते तु तत्प्रसिद्धिः। एवं कामाज्ञानकृतकाम्यकर्मपापयोरपि पश्चादर्पणे फलाभाव एव इति ॥ ६४ ॥

अथ गौणीष्वेव विशेषश्चिन्त्यते, तत्र श्रुतिस्मृतिमध्ये यत्स्वरूपमुच्यते, यथा— "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः"[1] इत्यादि।

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥[2]

इत्येवमादि ॥ ६४ ॥

तव किमेवंविधेष्वेव ध्याननियमः पूर्णप्रादुर्भावादौ वा यथा श्रुतेष्विति। तत्र ध्येयस्वरूपश्रवणान्नियमप्राप्तावुच्यते—

ध्याननियमस्तु दृष्टसौकर्यात् (१०) ॥ ६५ ॥

ध्याननियम इस लिए बताया जाता है कि उसके द्वारा ध्येय के रूप में चित्त भलीभाँति लगे। यही ध्यान का दृष्ट फल है और इसी की सुविधा के लिए उसका नियम बताना आवश्यक है ॥ ६५ ॥

ध्याने ध्येयनियमकथनं दृष्टार्थं नानाविषयत्वे चित्तविक्षेपसम्भवात्। तस्मात् सौकर्यार्थमेव तत्कथनं ज्ञेयम्, अदृष्टार्थत्वे विकल्पादिप्रसङ्गात्। तस्माद्यथा श्रुतेषु व्यवस्था। अत एव गोपीनां शिशुपालादेश्च तन्नियममन्तरेणैव ध्यानस्य दुर्लभं फलमुपलब्धमिति ॥ ६५ ॥

तद्यजिः पूजायामितरेषां नैवम् (११) ॥ ६६ ॥

यान्ति मद्याजिनोऽपि माम् (९।२५) इस गीता वचन में जो यज धातु का प्रयोग है, वह ज्योतिष्टोम आदि यज्ञों का वाचक है या अन्य किसी अर्थ का ? इस प्रश्न का समाधान किया गया है कि यहाँ यज धातु पूजा अर्थ में है। अन्य यज्ञयागादिकों में यज धातु पूजा के अर्थ में प्रयुक्त हुआ है ॥ ६६ ॥

"यान्ति मद्याजिनोऽपि माम्"[3] इत्यत्र यजिः किं प्रसिद्धज्योतिष्टोमादिविषयः ? किंवा पूजावचन इति ? तत्रायं यजिः पूजायामेव प्रयुक्तः, कुतो ज्ञायते ? विष्णुं पूजयेदित्यादिना, नित्यकाम्यपूजा तादर्थ्ये विहिता, तस्याः परभक्त्यङ्गत्वमात्रमत्र विधीयते, तेन तादर्थ्यम्। इतरयागानां तु न तादर्थ्यं श्रुतं तेषामीश्वरोद्देश्यकत्वं

(१) छा० उ० १।६।६। (२) ना० पा० रा० ११।७१। (२) गीता ९।२५।

भक्तिसंयोगश्चोभयं विधातव्यमिति वाक्यभेदः स्यात्। "अथ विष्णवे उरुक्रमाय सूते चरुम्" इत्यादिविहितस्य भक्तिसंयोगोऽस्त्विति चेत् ? सत्यम्; काम्यानां तत्फलेनैव निराकाङ्क्षत्वात्। जीवनमात्रनिमित्तकनित्यपूजायास्तु भक्तिसंयोगविधौ बाधकाभावात्, नित्यत्वे सततोपस्थितिलाघवाच्चेति। अत एव मोक्षधर्मे हिंसायुक्तधर्मनिन्दायाम्—

सर्वकर्मस्वहिंसां हि धर्मात्मा मनुरब्रवीत्।
कामरागा हि हिंसन्ति बहिर्वेद्यां पशून् नराः॥[1]
विष्णुमेवाभिजानन्ति सर्वयज्ञेषु ब्राह्मणाः।
पायसैः सुमनोभिश्च तथापि यजनं स्मृतम्॥[2] ॥ इति ६६ ॥

अथ पूजाप्रस्तावादधिकरणत्रयम्—

पादोदकं तु पाद्यमव्याप्तेः (१२) ॥ ६७ ॥

पादोदक शब्द पाद्य (पाद पखारने के उद्देश्य से भगवान् को समर्पित जल) के अर्थ में प्रयुक्त होता है।

साक्षात् चरणों का जल अर्थ करने पर अव्याप्ति दोष होगा; क्योंकि साक्षात् भगवच्चरणजल सुलभ नहीं है ॥ ६७ ॥

एवं स्मर्यते —

गङ्गाप्रयागगयपुष्करनैमिषाणि
पुण्यानि यानि कुरुजाङ्गलयामुनानि।
कालेन तीर्थसलिलानि पुनन्ति पापान्
पादोदकं भगवतः प्रपुनाति सद्यः॥[3]

इत्यत्र तत् किं पादसंयुक्तं जलं पादोदकमुत पादे दत्तकोत्सृष्टं जलम् ? तत्र पाद्यमेव पादोदकम्, कुतो ज्ञायते ? अन्यथाऽव्याप्तिप्रसङ्गात्। तथाहि भगवतः साक्षात्पादसम्बन्धो न सम्भवति, नाप्यवतारद्वारा; तस्याप्यनुष्ठातृसन्निधानासम्भवात्, किन्तु पूजाधिष्ठानप्रतिमापादसम्बन्धादुपचारस्तत्रापि प्रतिष्ठितायाः, अप्रतिष्ठितायास्तु पूजार्थमावाहने सति, तथा च शालिग्रामशिलाद्यधिष्ठाने पादाभावे तन्न स्यात्। तत्रैवं व्याप्त्यनुरोधात् पाद्यमेवास्तु, प्रतिमाद्यत्यन्तव्यवहितसम्बन्धकल्पनाप्रसङ्गात् ॥ ६७ ॥

(१) म० भा० शा० प० २६५।५। (२) शा० प० २६५।१०। (३) नृ० पु० ५९।४६।

स्वयमर्पितं ग्राह्यमविशेषात् (१३) ॥ ६८ ॥

प्रत्येक वैष्णव भक्त को अपने द्वारा भगवान् को समर्पित नैवेद्य का ग्रहण करना समुचित है; क्योंकि विष्णुभक्त होने से वह उसका अधिकारी है ॥६८।

पूजायां भगवते दत्तनैवेद्यनिर्माल्यादिकं वैष्णवं सात्वतेभ्य इत्यादिना प्रतिपाद्यत्वेन विहितम्, तदिह सात्वतत्वाविशेषादेव भगवद्भक्तेन स्वयमपि ग्राह्यं भोजनधारणादिना स्वोपकार्यमित्यर्थः। स्वयमपि ग्रहणे प्रतिपत्तिः सिद्ध्यति। धर्मशाठ्यं तु वर्जनीयमेव, यथा अग्न्याद्युद्देशेन त्यक्तपुरोडाशस्यापि उत्तरार्द्धात् स्विष्टकृतमवद्यति, यजमानपञ्चमाः पुरोडाशं भक्षयन्तीति प्रतिपत्तिः, तथेदमपि वचनादेव। अन्यथा सात्वतेभ्योऽपि न प्रतिपादयेत्, परद्रव्यत्वात्। वचनादिति चेत्; ? न हि वचने स्ववर्जनमुक्तम्। अथ ब्राह्मणेभ्यो दद्यादित्यादिना ब्राह्मणत्वादात्मनेऽपि दानप्रसङ्गादिति चेत्; ? दानस्य स्वस्वत्वध्वंसेन परस्वत्वापादानरूपत्वात्। न चैवं प्रतिपत्तौ युक्तम्, पुरोडाशस्यापि यजमाने प्रतिपत्तिदर्शनात्। क्रयादिवत् प्रतिपत्तिरपि स्वत्वापादिकैव। तदेवं यत्रान्यसात्वतासंपत्तिस्तत्र स्वयं ग्रहणेनाप्यवैगुण्यं परिहार्यमेव, तथा स्वयं दत्तपाद्यादिधारणेऽपि ज्ञेयमिति। किञ्च, "तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः"[1] इत्यत्र समानकर्तृकत्वात् स्वत्वध्वंसे समानकर्मत्वप्रतीतेः। क्त्वासमभिव्याहृतनञः सामानाधिकरण्येनान्वयात्, तैर्दत्तानित्यत्र तज्जातीयपरत्वे मानाभावात्। तस्माद् बाधकं विना देवेभ्यो दत्तमपि भोक्तव्यमिति ध्येयम् ॥ ६८ ॥

निमित्तगुणाव्यपेक्षणादपराधेषु व्यवस्था (१४) ॥ ६९ ॥

पूजा के अनेक अपराध बताये गये हैं उनमें निमित्त गुण और अनपेक्षा के अनुसार व्यवस्था होती है कहीं निमित्त से, कहीं गुण से, और कहीं अनिच्छा से अपराध होते हैं इनमें अनिच्छापराध से निमित्तापराध तथा उससे गुणापराध बड़ा माना जाता है ॥ ६९ ॥

"देवपूजापराधास्ते द्वात्रिंशत् परिकीर्तिताः।"[2] इत्युपक्रम्य द्वात्रिंशापराधास्तत्तत्प्रायश्चित्तानि च विहितानि। तत्र किं सर्वापराधवर्जनं पूजाङ्गमुत केषाञ्चिद्वर्जनमङ्गं केषाञ्चित् पुरुषार्थ इति। अत्रोच्यते—

अकर्मण्येन पुष्पेण यो मामर्चयते नरः।
पतनं तस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ॥[3] इत्यादि।

---

(१) गीता ३।१२। (२) वा० पु० १५।२६। (३) वा० पु० १२४।६५।

तत्राकर्मण्यानां पुष्पाणां पर्युदस्तत्वान्न पूजाङ्गत्वम्, किन्तु पूजाक्रमप्रयोगमध्ये भ्रमादिनार्पणे कृते तन्निमित्तमपेक्ष्य प्रायश्चित्तम्। यत्र तु—"अदत्वा गन्धमाल्यानि धूपं यो मे प्रयच्छति"[1] इत्यनेन पूजाक्रमभङ्गापराधे तत्तत्क्रमस्य पूजाङ्गत्वादङ्गवैगुण्यपरिहारात् तत्प्रायश्चित्तस्याङ्गत्वं द्रष्टव्यम्। यत्र पूजामन्तरेण "दन्तकाष्ठमखादित्वा यस्तु मामुपसर्पति"[2] इत्यादि श्रुतम्, तत्र व्यक्तमेव पुरुषार्थत्वमिति व्यवस्थैवेति ॥ ६९ ॥

एवं पूजाया भक्तिसंयोगसिद्धौ—"पत्रं पुष्पं फलं तोयम्"[3] इत्यनेन भगवदुद्देश्यकदानमात्रस्य भक्त्यङ्गत्वविधिरित्याह—

पत्रादेर्दानमन्यथा हि वैशिष्टयम् (१५) ॥ ७० ॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति (९।२६) इस गीता वाक्य के अनुसार पत्र-पुष्पादि से उपलक्षित सब प्रकार का दान जो भगवान् के उद्देश्य से किया गया हो, वह पराभक्ति का अङ्ग है। यदि ऐसा न माना जाय तो केवल पत्र, पुष्प, फल और जल इन चार वस्तुओं से विशिष्ट दान ही भक्ति का अङ्ग होगा ॥ ७७ ॥

यद्यदिष्टतमं लोके यच्चान्यद्दयितं गृहे।
तत् तद्धि देयं प्रीत्यर्थं देवदेवाय चक्रिणे॥

इत्यादिना प्राप्तस्य भगवदुद्देश्यकसर्वदानस्य भक्त्यङ्गत्वविधिः; अन्यथा पत्रादिचतुष्टयविशिष्टदानमेव स्यात्। प्रत्येकविधौ वाक्यभेदः। तस्मात् पत्रादिशब्देन प्राप्तं दानमनूद्य—उपव्ययत इत्यनेन नित्योपवीतस्य दर्शाङ्गत्ववदङ्गत्वविधिरेव युक्त इति ॥ ७० ॥

सुकृतजत्वात् परहेतुभावाच्च क्रियासु श्रेयस्यः (१६) ॥ ७१ ॥

गौणी भक्तियाँ पूर्वपुण्य के फल रूप से प्राप्त होती हैं और पराभक्ति की प्राप्ति में सहायक होती हैं। अतः वे समस्त क्रियाओं में कल्याणकारिणी होती हैं ॥ ७१ ॥

ता भक्तयः सर्वकर्मसु श्रेयस्य एव, कुतः? परभक्तिहेतुत्वात्, इतरधर्मजन्यत्वाच्च, यथा—

बहवो ज्ञानतपसा पूता मद्भावमागताः।
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्॥[4]

भावशब्दश्च भक्तौ प्रयुक्तः,

---

(१) वा० पु० २५।२६। (२) वा० पु० १२५।१। (३) गीता ९।२६। (४) गीता ४।१०-११।

गङ्गाजले किं न वसन्ति मत्स्या
देवालये पक्षिगणा वसन्ति।
भावोज्झितास्ते न फलं लभन्ते
तीर्थाच्च देवायतनाच्च मुख्यात् ॥[१] इत्यादौ।

तथा—

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ॥[२]

अत्र पूर्वसुकृतजत्वाद्भक्तीनां तास्तेभ्यो मुख्याः। एतेन भक्तिमीमांसायां विचारो युज्यते, न कर्ममीमांसायामित्युक्तम् ॥ ७१ ॥

ननु भक्तानां न गौणमुख्यभावस्तथा सति—

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ इति।

इति चतुर्णां तुल्यवदभिधानं किं कृतमित्यत आह—

गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम् (१७) ॥ ७२ ॥

गौणी भक्ति के तीन भेद हैं—(१) आर्तभक्ति, (२) जिज्ञासाभक्ति और (३) अर्थार्थिताभक्ति। ज्ञानभक्ति तो पराभक्ति रूप है उसके साथ पूर्वोक्त तीन भक्तियों का उल्लेख उनकी स्तुति के लिए किया गया है ॥ ७२ ॥

गौणं त्रैविध्यमेव तासां मुख्येन साहचर्यश्रवणं तु स्तुत्यर्थम्। यथा राजसमभिव्याहारेणामात्यानाम्। एवञ्च पापक्षयविपदुद्धारादिनिमित्तं स्मरण-कीर्तनाद्यार्तभक्तिः, ज्ञानार्थं यज्ञाद्याचरणं जिज्ञासोर्भक्तिः। यथा च—"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन"[३] इत्यादि। तथा

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दन्ति मानवाः।[४]

न चलति निजवर्णधर्मतो यः
सममतिरात्मसुहृद्विपक्षपक्षे।
न हरति न च हन्ति किञ्चिदुच्चैः
स्थितमनसं तमवेहि विष्णुभक्तम् ॥[५]

इत्यनेन स्वस्ववर्णाश्रमविहितवेदानुवचनादीनां ज्ञानार्थमनुष्ठानं जिज्ञासा भक्तिः। अर्थार्थिता भक्तिरपि द्विधा, तत्रैका परभक्त्यर्थं क्रियमाणा पूर्वोक्ता राज्यस्वर्गाद्यर्थं क्रियमाणा च कीर्तनादिरूपाऽपरा। यथा—

---

(१) कू० पु० २५।७। (२) गीता ७।१६। (३) बृ० उ० ४।४।२२। (४) गीता १८।४८। (५) वि० पु० ३।७।१६।

भौमान् मनोरथान् कामान् स्वर्गिवन्द्यं परं पदम्।
प्राप्नोत्याराधिते विष्णौ निर्वाणमपि चोत्तमम् ॥[1] इति।

तत्र निर्वाणप्राप्तिः परभक्तिद्वारेति परभक्तिप्रयोजनार्थिता "ये भजन्ति च मां भक्त्या मयि ते तेषु चाप्यहम्"[2] इत्यनेन सहैकवाक्यत्वात्। यच्च श्रीमद्भागवते—

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।[3] इति।

तदेतेष्वेव यथायथमन्तर्भावनीयम्। तदेवमुपाधीनामेषामुपधेयसाङ्कर्येऽपि न दोष इति ॥ ७२ ॥

ननु कीर्तनादीनामङ्गत्वे कथमार्त्यादिषु प्राधान्यं घटत इत्यपेक्षायामुच्यते—

बहिरन्तरस्थमुभयमवेष्टिसववत् (१८) ॥ ७३ ॥

स्मरण, कीर्तन, आदि साधन बाहर रहकर स्वतन्त्र एवं पराभक्ति के साधन रूप से भीतर रहकर परतन्त्र भी होते हैं। इस प्रकार वे उभयरूप हैं। ठीक वैसे ही जैसे अवेष्टि याग एवं बृहस्पति कहीं राजसूय एवं वाजपेय के अङ्ग के रूप में उपलब्ध होते हैं तथा कहीं प्रधान रूप से भी रहते हैं ॥ ७३ ॥

स्मरणकीर्तनादीनां परभक्त्यङ्गतया तदन्तर्गतत्वमनारभ्य फलान्तरश्रवणात् तद्बहिर्भावेनोत्कर्षोऽपि। यथा राजसूयान्तर्गताप्यवेष्टिः प्रधानापि अनारभ्य फलान्तरसम्बन्धात् तत उत्कृष्यते। यथा वा बृहस्पतिसवः क्वचित् प्रधानमपि वाजपेयाङ्गं तद्वत् प्रमाणसत्त्वाभ्यां विशेषात्। एवम्—

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥[4]

इत्यनेन सर्वकर्मणां नैमित्तिकाङ्गत्वेनापि प्रवृत्तेः स्वभावाङ्गत्वं स्वर्गादिफलाय प्राधान्यं च न विरुद्धमिति ॥ ७३ ॥

इदानीमार्तभक्तौ विशेषश्चिन्त्यते—

स्मृतिकीर्त्योः कथादेश्चार्तौ प्रायश्चित्तभावात् (१९) ॥ ७४ ॥

स्मरण, कीर्तन, कथाश्रवण, नमस्कार आदि साधन आर्तभक्ति में प्रायश्चित्त रूप से कहे गये हैं। देखिए विष्णु पुराण २।३।३७ ॥ ७४ ॥

---

(१) वि० पु० ३।७।३। (२) गीता ९।२९। (३) श्रीमद्भागवत ७।५।२२,२३।
(४) प्र० शा० पृ० ४२।

स्मरणकीर्तनकथानमस्कारादीनामार्तभक्तौ निवेशस्तत्तत्पापकृतनरकीर्तिमतां तत्तत्पापक्षयहेतुत्वेन कथनात्, यथा—

पापे गुरूणि गुरुणि लघूनि च लघुन्यपि।
प्रायश्चित्तानि मैत्रेय जगुः स्वायंभुवादयः ॥[1]
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥[2]

तथा—

यन्नामकीर्तनं भक्त्या विलायनमनुत्तमम्।
मैत्रेयाशेषपापानां धातूनामिव पावकः ॥[3]

एवं—

सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनम्।
न तथा फलदं सौते नारायणकथा यथा ॥
पाविताङ्गाः स्मः संवृत्ताः श्रुत्वेमामादितः कथाम्।
नारायणाश्रयां पुण्यां सर्वपापप्रणाशिनीम् ॥[4] इत्यादि।

तस्माद्युक्तमार्तौ निवेशनमिति ॥ ७४ ॥

भूयसामननुष्ठितिरिति चेदाप्रयाणमुपसंहारान्महत्स्वपि (२०) ॥ ७५ ॥

यदि कहा जाय कि आर्तभक्ति के द्वारा जो अपने बड़े-बड़े पापों के नाश के लिए बहुत से क्लेशसाध्य श्रेष्ठ कर्मों का अनुष्ठान नहीं हो रहा है, तब तो कीर्तन आदि लघु साधनों द्वारा उसके लघु पापों का ही क्षय हो सकता है, बड़े पातकों का नहीं तो ऐसा कहना ठीक नहीं; क्योंकि उसके लिए आजन्म भगवत्स्मरण की विधि का उपसंहार विष्णु पुराण में देखा जाता है। अतः बड़े पातकों को भी दूर करने में स्मरण कीर्तन आदि समर्थ हैं। देखिए वि० पु० २।६।४२ ॥ ७५ ॥

(क) उभयत्राकरम्भपार्थक्यंचिन्त्यम्।

स्यादेतत्। न्यायविरोधादेतद्वचनानां स्वल्पपापविषयत्वमेव युक्तम्, अन्यथा भूयः क्लेशसाध्यानामननुष्ठानलक्षणमप्रामाण्यमितिचेत; न, तेषामामरणमुपसंहारस्मरणात्, क्लेशाधिक्यात्। यथा—

तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने।
न याति नरकं शुद्धः संक्षीणाखिलकल्मषः ॥[5]

---

(१) वि० पु० २।६।३२। (२) वि० पु० २।६।३३। (३) वि० पु० ६।७।६।
(४) म० भा० शा० प० ३४३।२,३। (५) वि० पु० २।६।२९।

इत्यनेन सातत्योपसंहारात्, उपक्रमोपसंहारयोरेकार्थत्वादिति भावः। न चोपक्रमे कालः श्रूयते येन तद्विरोधादुपसंहारस्य भिन्नार्थतापि भवेत्। तथा च क्लेशसाम्यादितरेषां नाननुष्ठानमप्रामाण्यम्, "प्रातर्निशि तथा सन्ध्यामध्याह्नादिषु संस्मरन्"[1] इत्येतदवयुत्यानुवाद एव। नाप्यनुतप्ताधिकारिकमिदम्—

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्॥[2]

इत्यस्यापि सर्वप्रायश्चित्ताङ्गानुतापस्यानुवादत्वादेकमित्यस्यापि प्रायश्चित्तान्तर-नैरपेक्ष्यस्य न्यायप्राप्तस्यानुवादः, अन्यथा वाक्यानि भिद्येरन् विशिष्टविषयाश्च भवेयुः। अतो यच्छब्दान्तर्गतत्वाद्यथायथमनुवादत्वान्नार्थवादत्वं पूर्ववाक्यानाम्। अत एवान्यत्रापि—

किङ्करा दण्डपाशौ वा न यमो न च यातनाः।
समर्थास्तस्य यस्यात्मा केशवालम्बनः सदा॥
चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत्।
नाशौचं विद्यते तस्य स पवित्रकरो यतः॥[3]

इत्यादिभिः सातत्यमुक्तमिति॥ ७५॥

लघ्वपि भक्ताधिकारे महत्क्षेपकमपरसर्वहानात् (२१)॥ ७६॥

एक बार का किया हुआ स्मरण-कीर्तन आदि लघु होते हुए भी बड़े-बड़े पातकों को नष्ट करने में समर्थ होता है; क्योंकि भक्त के लिए भगवत्स्मरण या भगवच्छरणागति से भिन्न अन्य सब प्रायश्चित्तों के त्याग की विधि गीता (१८।६६) में बतलाई गयी है॥ ७६॥

लघ्वपि सकृत्स्मरणकीर्तनादि महतामपि पापानां क्षेपकं नाशकं भवति। यतो भक्ताधिकारे प्रायश्चित्तान्तराणां सर्वेषां त्यागलक्षणहानिप्रतीतेरित्यर्थः। यथा—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच॥[4]

अत्र हि न काम्यकर्मत्यागपूर्वकत्वमर्थः, काम्यत्यागे पापाभावात् किं भगवता मोक्षणीयम्। अथ पापान्तरं नाश्यं काम्यत्यागस्यादृष्टार्थत्वापत्तेर्नित्यनैमित्तिकयोरपि त्यागपूर्वकता न तस्यार्थः, तयोस्त्यागे यदि विधिरस्ति न ततः पापम्, किं मोक्षणीयम्? अथ नास्तीति वाच्यम्। मैवम्; एवं वाक्येनैव तद्विधानात्, पापा-

(१) वि० पु० २।६।३५। (२) वि० पु० २।६।३४। (३) वि० पु० ३।७।३४,३५।
(४) गीता १८।६६।

जनकत्वात्। अथ सर्वधर्मान् परित्यज्येत्यनेन संन्यासिनमनूद्य तदधिकारिकमिदं तेषामवकीर्णादिप्रायश्चित्तादिस्मरणात् तैः सह विकल्पप्रसङ्गात् पूर्ववन्महतामननुष्ठानं च स्यात्, न च सातत्येन तद्दोषपरिहारः,

महापातकयुक्तोऽपि ध्यायन्निमिषमच्युतम्।
पुनस्तपस्वी भवति पङ्क्तिपावनपावनः ॥[1]

इत्यादिना लघुनोऽपि महत्क्षेपकत्वात्। किञ्च, संन्यासाश्रमस्यासन्निधानेन बुद्ध्यनारोहात्। तस्माद्यथा लोके "सर्वान् विहाय मां भज क्लेशांस्ते नाशयिष्यामि" इत्यत्र क्लेशनाशकान्तरहानिः प्रतीयते। तथान्तरपापनाशकान्तरत्यागोऽवगम्यते वाक्यादेव। एतेन कथञ्चित् संन्यासविधायकेन सहैकाध्यायपाठेऽपि न तद्विषयकत्वम्; प्रकरणसन्निधानयोः सबलत्वात्। किञ्चास्मिन्नध्याये,—"काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः"[2] इत्यादिना काम्यकर्मत्याग एवोक्तः, न संन्यासाश्रमः। एवञ्च प्रायश्चित्तान्तरत्यागसङ्कल्पेन केवलभगवन्नामादिभिरार्तिं यस्तर्तुमिच्छति तदधिकारिकमेव सकृत्स्मरणादि। तथा च भिन्नाधिकाराद् दूषणानां न समुच्चितिः, नापि क्लेशभयाद् भूयसामननुष्ठानम्—

दुःखमित्येव यत् कर्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥[3]

इत्यनेन तादृशसंन्यासस्य हेयत्वात्—

कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम्।
प्रयाति विलयं सद्यः सकृद्यत्रानुसंस्मृते ॥[4] इत्यादि।

तदधिकारपरम्। एवम्—

अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥[5]

इत्यनेन, तथा—

---

(१) अ० स्मृ० ३।१४। (२) गीता १८।२। (३) गीता १८।८।
(४) वि० पु० ६।७।१०। (५) गीता ९।३०,३१।

नारकाः कृष्णकृष्णेति नारसिंहेति चुक्रुशुः ।
इति संकीर्तितो विष्णुर्नारकैर्भक्तिपूर्वकम् ।
नारक्यो यातनाः सर्वास्तेषां नष्टा महात्मनाम् ॥[1]

इत्यादिना च भक्त्यधिकारः सुव्यक्त इति । अत्र कीर्तनस्योच्चारणत्वमात्रमिह प्रतीतम्, न तु प्रथमान्तपदेनेत्यादिनियम इति ॥ ७६ ॥

तत्स्थानत्वादनन्यधर्मः खले वालीवत् (२२) ॥ ७७ ॥

स्मरण, कीर्तन आदि को पाप के प्रायश्चित्तभूत कृच्छ्रचान्द्रायण आदि व्रत के स्थान में प्रतिष्ठित किया गया है । अतः उसके द्वारा पापों का नाश तो होगा ही; किन्तु अन्य प्रायश्चित्तों में जो मुण्डन आदि करने की विधि है, उन सब अन्य धर्मों का पालन कीर्तनपरायण भक्त के लिए आवश्यक नहीं रह जाता है । जैसे खलिहान में मेह को यज्ञयूप के रूप में व्यवहार लाने पर उसमें पशु को बाँधा तो जाता है; किन्तु यूप के निमित्त आवश्यक मानी गयी अन्य विधियों का अनुष्ठान वहाँ आवश्यक नहीं समझा जाता है ॥ ७७ ॥

"प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्"[2] इत्यादौ नामातिदेशेन प्रायश्चित्तान्तरधर्मस्तु न मन्तव्यः, प्रायश्चित्तस्थानत्वात्, तत्स्थाने तद्विधानादित्यर्थः । यथा—"खले वाली यूपो भवति"[3] इत्यत्र पशुनियोजने यूपकार्ये खले वालीविधिरिति । न यूपधर्मस्याष्टास्रिकरणादेः प्रसङ्गः, तद्वदत्र नखलोमादिवपनानां प्रायश्चित्तधर्माणामप्राप्तिरिति । न कीर्तनादेरपि पापक्षयहेतुत्वात् प्रायश्चित्तमेवेति वाच्यम् ।

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तयोर्निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥

इत्यनेन तपोरूपे प्रायश्चित्तशब्दो मुख्यः, अन्यत्र गौण इति ध्येयम् ॥ ७७ ॥

अथाङ्गानां प्रधानाधिकरणनैयत्यात् तदधिकारश्चिन्त्यते ।

आनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत् (२३) ॥ ७८ ॥

गुरु तथा शास्त्रों के उपदेश की परम्परा से यही बात सिद्ध है कि भगवद्भक्ति में उच्च जाति से लेकर नीच जाति चाण्डाल तक के मनुष्यों का

---

(१) नृ० पु० ८।२८-२९ ।　(२) वि० पु० २।६।३४ ।　(३) आ० श्रौ० सूत्र ९।७ ।

समाग रूप से वैसा ही अधिकार हैं जैसा कि अहिंसा, सत्य, अस्तेय आदि सामान्य धर्मों के ज्ञान एवं अनुष्ठान में सबका समान अधिकार है ॥ ७८ ॥

निन्दितचाण्डालादियोनिपर्यन्तं भक्तावधिक्रियते, संसारदुःखजिहासाया अविशेषात्। अथ वेदाध्ययनानधिकारात् कथमत्रैवर्णिकानां स इति चेत्, तत्राह—पारम्पर्यादिति। "चोदनालक्षणोऽर्थो धर्मः",[1] "शास्त्रयोनित्वात्"[2] इति न्यायादलौकिकोऽर्थः श्रुत्यैकसमधिगम्य इत्यत्र न विप्रतिपद्यामहे, किन्तु स्त्रीशूद्रादीनामितिहासपुराणादिद्वारा चाण्डालादीनां च स्मृत्याचारवदुपदेशपारम्पर्येण ज्ञानमपि श्रुतिमूलमेव भवति। यथा तेषां सामान्याऽहिंसाधर्मादिज्ञानम्। अन्यथा तदसिद्धिप्रसङ्गादिति ॥ ७८ ॥

अतो ह्यविपक्वभावनामपि तल्लोके (२४) ॥ ७९ ॥

अतः इस लोक में जिनकी पराभक्ति परिपक्व नहीं हुई है, उनके द्वारा भी भगवान् के श्वेतद्वीप आदि लोकों में रहकर भक्ति साधना का अनुष्ठान किया जाता है। यह बात इतिहास पुराणों में प्रसिद्ध है (म० भा० शा० प० ३३८) ॥७९॥

यतः सर्वाधिकारोऽतः खलु येषामत्र परभक्तिर्विपक्वभावं न गता तेषां श्वेतद्वीपे भगवल्लोके परभक्तिसाधनानुष्ठानं स्मर्यते। यथा—

क्षीरोदधेरुत्तरतः श्वेतद्वीपो महाप्रभः।
तत्र नारायणपरा मानवाश्चन्द्रवर्चसः ॥
एकान्तभावोपगतास्ते भक्ताः पुरुषोत्तमे।[3]

इत्याद्युपक्रम्य तेषां परभक्तिसाधनानुष्ठानं श्रुतम्—

सहिताश्चाभ्यधावन्तस्ततस्ते मानवा द्रुताः।
कृताञ्जलिपुटा हृष्टा नम इत्येव वादिनः ॥
ततो विवदतां तेषामश्रौषं विपुलध्वनिम्।
बलिः किलोपक्रियते तस्य देवस्य तैर्नरैः ॥[4] इत्यादि।

तस्मात् सर्वत्र तदधिकार इति। अत एव—तदुपर्यपि बादरायणेन सम्भावात्[5] इति सूचितम् ॥ ७९ ॥

---

(१) पू० मी० १।१।२। (२) उ० मी० (ब्र० सू०) १।१।३। (३) म० भा० शा० प० ३३६।२७.२८। (४) शा० प० ३३६।४०,४१। (५) ब्रह्मसूत्रम् १।३।२६।

अथ विपक्वभावानामपि कथं न तल्लोक इत्युपोद्घातेनोच्यते—

क्रमैकगत्युपपत्तेस्तु (२५) ॥ ८० ॥

ऐसा मानने से ही क्रममुक्ति तथा एकगति का प्रतिपादन करने वाले वचनों की सङ्गति होती है। अर्थात् जिनकी भक्ति परिपक्व नहीं हुई है वे क्रमशः भिन्न-भिन्न लोकों में होते हुए अन्त में परिपक्वावस्था में पहुँचने पर भगवान् को प्राप्त होते हैं और जो यहीं पराभक्ति में परिपक्व हो चुके हैं, वे अन्य किसी गति को न प्राप्त होकर एकमात्र भगवान् को ही प्राप्त होते हैं। इस प्रकार का सिद्धान्त स्वीकार करने पर ही उभयविध गति के प्रतिपादक शास्त्रीय वचन संगत होते हैं ॥ ८० ॥

तुश्चागतशङ्काव्यवच्छेदार्थः। नारायणीय एवं श्रूयते—"येऽतिनिष्कलुषा लोके पुण्यपापविवर्जिताः"[1] इत्युपक्रम्य आदित्यमण्डलद्वारा अनिरुद्धप्रद्युम्नसंकर्षणव्यूहक्रमेण गतिमभिधायाभिहितम्—

समाहितमनस्कास्तु नियताः संयतेन्द्रियाः।
एकान्तभावोपगता वासुदेवं विशन्ति ते ॥[2]

इति क्रमगत्यभिधानम्। तथा पश्चादुक्तम्—

ये तु दग्धेन्धना लोके पुण्यपापविवर्जिताः।
तेषां त्वयाभिनिर्दिष्टा पारंपर्यक्रमाद्गतिः ॥
चतुर्थ्यां चैव ते गत्यां गच्छन्ति परमं पदम्।
नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणप्रियः ॥
अगत्वा गतयस्तिस्रो यद्गच्छन्त्यव्ययं हरिम्।[3]

इत्येकगत्यभिधानं च पक्वभक्तिविषयत्वेनोपपद्यते। अन्यथा विरोधात् तस्मादपक्वविषयस्तत्तल्लोकलाभ इति ॥ ८० ॥

उत्क्रान्तिस्मृतिवाक्यशेषाच्च (२६) ॥ ८१ ॥

गीता के ८वें अध्याय में जो उत्क्रान्ति (देहत्याग) के पश्चात् होने वाली परमगति का वर्णन आया है, उसके वाक्यशेष में क्रममुक्ति का प्रतिपादन किया गया है। इससे भी यही सिद्ध होता है कि परिपक्व भक्ति वाले पुरुषों को अनन्य गति की प्राप्ति होती है और अपक्व भक्ति वाले को क्रममुक्ति मिलती है ॥ ८१ ॥

---

(१) म० भा० शा० प० ३४४।१३। (२) शा० प० ३४४।१९। (३) शा० प० ३४८।२-४।

उत्क्रान्तौ—"भक्त्या युतो योगबलेन चैव"[१] इत्युपक्रम्य—

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥[२]

इत्युक्तम्। तत्र च वाक्यशेषः —

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥[३]

इति क्रमाद्गतिः श्रुता, तथा—

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥[४]

इतिवाक्यशेषे लोकोपक्रमादुपशब्दमहिम्ना च तत्समीपलोकप्राप्तिरविपक्वभावानामेव युक्ता, विपक्वभावस्य न; तल्लोकगमनमपि फलं युज्यते, तत्फलस्याक्षयित्वात्, तल्लोके साधनाननुष्ठानश्रवणाच्च। किञ्च, अविपक्वभक्तेस्तत एव क्रममुक्तिसिद्धौ तत्कालीनस्मरणविधिवैयर्थ्यप्रसङ्गात्। न च तेन परभक्तिसमुच्चयो घटते—"पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया"[५] इत्यन्यनिरपेक्षमोक्षसाधनत्वावगतेः। तस्मात् तल्लोकेऽप्यधिकारः। भारतभूमेस्तु—

न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते।[६]

इत्यनेन कर्मोत्पत्तिहेतुतैव, भक्तिस्तु न कर्मात्मिकेत्युक्तं प्राक्। तदङ्गानामप्राप्तिः स्यादिति चेन्? न, प्रधानप्राप्तावेवाङ्गप्राप्तेर्निषादस्थपतियागाङ्गवदिति। शूद्रादीनां तु वैदिकमन्त्रजकर्मनिर्वृत्तिः, न तु स्मरणकीर्तनादेर्भक्तिसाधनस्येति तावतैवाधिकारसिद्धौ न विद्याप्रयुक्तिकल्पना युक्ता ॥ ८१ ॥

अस्तु तर्हि महापातकिनामपि परभक्तावेवाधिकारः, तथा तदङ्गाङ्गवेदानुवचनादावपीत्यत आह—

महापातकिनां त्वार्तौ (२७) ॥ ८२ ॥

यदि चाण्डालयोनि तक के मनुष्यों का भक्ति में अधिकार है, तब तो महापातकी मनुष्यों का भी उसमें अधिकार हो सकता है। इसके उत्तर में कहते हैं—जिनके द्वारा पतन के हेतुभूत महापातक बन गये हैं ऐसे लोगों का केवल आर्तभक्ति में अधिकार है और किसी में नहीं। उसके द्वारा पाप निवृत्ति हो जाने पर सब प्रकार की भक्ति में अधिकार हो जाता है ॥ ८२ ॥

(१) गीता ८।१०। (२) गीता ८।१३। (३) गीता ८।२४। (४) गीता ८।१६।
(५) गीता ८।२२। (६) वि० पु० २।३।५।

पतनहेतुपापरतानां च पुनरार्तिभक्तावेवाधिकारः, प्रायश्चित्तवन्नान्यत्र; तत्पापक्षयस्य सर्वापेक्षयाऽभ्यर्हितत्वात्। भुञ्जानो वर्धयेत् पापमित्यादिना। तदपगमे तु सुतरामधिकारसिद्धिः ॥ ८२ ॥

अथैकान्तिकप्रस्तावात् सर्वधर्मः किं पराभक्तितो भिन्न इति शङ्कापिशाचीमपाकरोति—

सैकान्तभावो गीतार्थप्रत्यभिज्ञानात् (२८) ॥ ८३ ॥

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ (९।२२)

इत्यादि गीता वचनों के अर्थ पर विचार करने से सिद्ध होता है कि भगवान् के प्रति एकान्तभाव = अनन्य प्रेम से ही पराभक्ति होती है ॥ ८३ ॥

सा पराभक्तिरेवैकान्तभावः, नान्यः; कुतः ? गीतार्थेन प्रत्यभिज्ञाश्रवणात्। यथा नारायणीय एव।

सहोपनिषदो वेदान् ते विप्राः सम्यगास्थिताः।
पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः ॥
ततो विशिष्टां जानामि गतिमेकान्तिनां नृणाम्।
केनैष धर्मः कथितो देवेन ऋषिणाथवा ॥[1]

इति प्रश्ने प्रत्युत्तरम्—

समुपोढेष्वनीकेषु कुरुपाण्डवसेनयोः।
अर्जुने विमनस्के वै गीता भगवता स्वयम् ॥[2] इति।

तस्मादेकान्तिता परभक्तिरिति ॥ ८३ ॥

अथ गौण्योऽपि साक्षान्मुक्तिं जनयन्तु को दोषस्तत्राह—

परां कृत्वैव सर्वेषां तथाह्याह (२९) ॥ ८४ ॥

पराभक्ति की प्राप्ति करके ही कीर्तन आदि गौण भक्ति साधनों का मुक्ति मे उपयोग होता है। अर्थात् वे मुक्ति के साक्षात् साधन नहीं हैं, पराभक्ति को प्राप्त कराकर ही उनके द्वारा मोक्ष प्राप्ति में कारण बनते हैं। ऐसा भगवान् श्रीकृष्ण ने गीता में स्वयं कहा है (१८।६८)।

परां भक्तिं कृत्वैव सर्वेषां मुक्तावुपयोगः। तथा हि सहेतुकं भगवानाह—

---

(१) म० भा० शा० प० ३४८।५,६। (२) शा० प० ३४८।८।

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयम् ॥[1] इति ।

तत्रैतद्धर्मस्योपदेशफलमपि ब्रह्मभावापत्तिरित्येवार्थसिद्धौ भक्तिं मयि परां कृत्वेति किमर्थमाह ? तस्या मोक्षसाधनत्वेन श्रुतत्वात् । अत एवोपरिचरवसोः — "आत्मराज्यं धनं च"[2] इत्यादिना परमेश्वरानुरक्तिरूपाया भक्तेर्लिङ्गं प्रदर्शितमिति स्वतः प्रयोजनत्वाभावात् । तस्मात् सर्वेषां मुक्तिहेतुत्वेन श्रुतानां परभक्तिजननेन मुक्तावुपयोग इत्यभिप्राय उन्नीयत इति । न चोभयजनकत्वं तस्य कर्मत्वेन मोक्षाजनकत्वात् । एवञ्च दृष्टार्थता भवति वाक्यस्येति ॥ ८४ ॥

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यभक्तिसूत्रभाष्ये
द्वितीयाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

—:o:—

तृतीयाध्यायस्य प्रथमास्याह्निकम्

भजनीयोत्तमत्वेन भक्तेरुत्तमता यतः ।
भक्ततद्भावतश्चात्र भजनीयो निरूप्यते ॥

भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्स्वरूपत्वात् (१) ॥ ८५ ॥

यह समस्त विश्व भजनीय भगवान् से अभिन्न है, क्योंकि सब कुछ उनका ही स्वरूप है ॥ ८५ ॥

ज्ञानाधीना ज्ञेयसिद्धिरिति तन्त्रेषु निर्णयः ।
ज्ञानं सत्ता न सा जातिर्जात्यादौ तदसत्त्वतः ॥
सत्त्वे वा नेष्टसम्बन्धकल्पनागौरवादपि ।
तस्माज्ज्ञानं परं ब्रह्म सर्वत्रानुगतं स्वतः ॥
तदभेदो दृश्यमात्रे दृश्यभेदस्तु सत्परे ।
घटो ज्ञानमितीदृक् स्यात् प्रत्ययः सन्निवेति चेत् ॥
अस्ति स्वरूपधीर्नैव सत्वत्त्वेनानुपस्थितेः ।
तदुपादानविषये ज्ञानेच्छाकृतिहेतुना ॥
तासां सविषयत्वेन हेतुत्वे लाघवं महत् ।
यत् तत् सविषयं ब्रह्म गुणवन्नैव गौरवात् ॥
कालवेद्योपाधिकृता तज्ज्ञातृत्वादिकल्पना ॥ इति ॥ ८५ ॥

---

(१) गीता १८।६८ । (२) शा० प० ३३५।२३ ।

तच्छक्तिर्माया जडसामान्यात् (२) ॥ ८६ ॥

भगवान् की ऐश्वर्य शक्ति का नाम माया है। वह माया भी भगवान् से अभिन्न नहीं है; क्योंकि जैसे अन्य जड़ तत्त्व भगवत्स्वरूप हैं वैसे ही यह माया भी भगवत्स्वरूप ही है।

तस्य ब्रह्मण ऐश्वर्यशक्तिर्मायेति गीयते—

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥[1]
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥[2]
तन्मायात्वं तु कार्याणां वैचित्र्यान्नानृतत्वतः।
कार्यसत्त्वोपपत्त्यर्थं ब्रह्मसत्ताश्रुतेरिति ॥
मिथ्यात्वस्यानुपपत्तेश्च तन्मिथ्यात्वं न साम्प्रतम्।
तत्त्वज्ञानेन बाध्यत्वं मिथ्यात्वमिति चेन्नहि ॥
मिथ्यात्वस्याप्यतथ्यत्वात् सत्यत्वं सुतरां स्थितम्।
मिथ्यात्वस्य च सत्यत्वे दृश्यसत्यत्वमागतम् ॥
अलीकानामभानाच्च भाष्यत्वे तु सदेव तत्।
रज्जौ सर्पादिभानं यदन्यथाख्यातिरेव सा ॥
अन्यस्य सदसत्त्वाभ्यां बाधाबाधव्यवस्थितेः।
सा माया जडसामान्यं ज्ञेयत्वं नित्यमेव तत् ॥
अन्यथा तु व्यवस्था स्यात् तस्माच्चिज्जाड्यनित्यता॥ इति ॥ ८६ ॥

व्यापकत्वाद्व्याप्यानाम् (३) ॥ ८७ ॥

भगवान् सच्चिदानन्द स्वरूप से सब में व्यापक हैं, व्याप्य वस्तुएँ व्यापक का स्वरूप होती हैं। अतः इस विश्व में कुछ भी भगवान् से भिन्न नहीं है ॥ ८७ ॥

एवं व्यापकतत्त्वेभ्यो व्याप्यतत्त्वसमुद्भवः।
व्यापकानां हि तादात्म्याद्व्याप्योपादानता मता ॥
न तावत् समवायेन भेदसम्बन्धगौरवात्।
शब्दानां समयोऽप्येवं शृङ्गग्राहिकया लघुः ॥
सत्त्वेन सर्वकार्येषु कारणत्वं परेशितुः।

---

(१) गीता ७।१४। (२) गीता ९।१०।

निमित्तत्वं हि तद्बुद्धेर्बोद्धव्येष्वनुगत्वतः ॥

बुद्धेस्तु साक्षिभास्याया अबोध्यत्वं यतो धियः ।
बोद्धव्याया बुद्धितत्त्वव्यभिचारेऽपि सम्भवेत् ॥

सुप्तोत्थितस्य प्रलयाद् बुद्धेः प्रथममुद्भवः ।
कार्यकारणभावादि बुद्ध्वा निर्माति स प्रभुः ॥

स्वतो निर्विषयाप्येषा चैतन्योपाधिभावतः ।
तैलादिवत् प्रदीपस्या सप्रकारप्रकाशिनी ॥

करिष्यामीतिसङ्कल्पादहङ्कारोद्भवस्ततः ।
स ऐक्षत बहुस्यामित्येवमादिश्रुतिस्मृतेः ॥

बुद्धेर्विकारेष्विच्छादावनुगत्वादहङ्कृतेः ।
साप्येकतत्वं तत्त्वे तु बुद्धिर्व्यापकभावनात् ॥

ईशोऽहं कृतिजन्यत्वात् तन्नैयत्यादहङ्कृतेः ।
मात्राभूतेन्द्रियादीनामहङ्कारोऽपि कारणम् ॥

तत्र शब्दस्पर्शरूपरसगन्धत्वसंज्ञया ।
सामान्यान्येव शब्दादिस्थूलानां चापि हेतवः ॥

सर्वत्र ग्रह एव स्यात् तत्त्वानामिति चेदतः ।
विकारग्रहणे जातिग्रहवत् तद्ग्रहस्थितेः ॥

एवं व्यापकतत्त्वानां व्याप्येष्वनुगमः क्रमात् ।
ब्रह्मादिसर्वतत्त्वानां घटोपादानता स्फुटम् ॥

न कर्मणान्यथासिद्धिरिह तत्त्वस्य युज्यते ।
तादात्म्यादन्यथासिद्धेरतादात्म्यप्रयोजकम् ॥

एवं कारणतत्त्वानां मोक्षोपायतया पुनः ।
निर्मितिः प्राणिबुद्ध्यादेरतादात्म्यात् पृथक् पृथक् ॥

आसर्गप्रलयादीनां बुद्धिर्नास्ति न यत् क्वचित् ।
सुषुप्तौ जीवबुद्धीनां लयोऽनन्तः स मोक्षणे ॥ इति ॥ ८७ ॥

अथानीश्वरसाङ्ख्यानां बुद्धेः सर्गो न युज्यते।
क्रमाद्विनिगमाभावादित्येतत् सूत्रमुच्यते॥

न प्राणिबुद्धिभ्योऽसम्भवात् (४) ॥ ८८ ॥

इस संसार की सृष्टि बुद्धिपूर्वक हुई है, यह बात इसकी सूक्ष्मता, सृष्टि-क्रम, उपयोगिता एवं व्यवस्था को देखते हुए प्रतीत होती है; तो क्या किसी जीव की बुद्धि से इस जगत् का निर्माण हुआ है ? इस प्रश्न का उत्तर देते हुए कहते हैं कि नहीं, प्राणियों की बुद्धि से जगत् की सृष्टि नहीं हुई है; क्योंकि जीव की स्वल्प बुद्धि के लिए यह असम्भव है अतः ईश्वर ही इसके निर्माता हैं ॥ ८८ ॥

क्रमाद् देवर्षिसर्गादिः श्रूयते कस्य बुद्धितः।
सम्भावद्भूतसर्गोऽयं तस्मादीशोऽस्ति बुद्धिमान् ॥इति॥८८॥

निर्मायोच्चावचं श्रुतीश्च निर्मिमीते पितृवत् (५) ॥ ८९ ॥

ऊँच-नीच, स्थूल-सूक्ष्म भेद वाले समस्त दृश्य प्रपञ्च एवं प्राणि वर्ग को उत्पन्न करके भगवान् उन्हें हिताहित का परिज्ञान कराने के लिए वेदों का भी प्राकट्य करते हैं। ठीक वैसे ही जैसे पिता पुत्रों को उत्पन्न कर उन्हें कर्तव्य-अकर्तव्य का ज्ञान कराने के लिए शिक्षा की व्यवस्था करता है ॥ ८९ ॥

उच्चावचानि भूतानि धर्माधर्मानुसारतः।
निर्माय निर्मिमीतेऽसौ वेदांस्तद्धितकाम्यया ॥
यथा पितोत्पाद्य पुत्रानज्ञातौ ज्ञापयत्यपि।
हिताहितपरीहारौ वाक्यैस्तद्वदयं प्रभुः ॥ इति ॥ ८९ ॥

मिश्रोपदेशान्नेति चेन्न स्वल्पत्वात् (६) ॥ ९० ॥

यदि कहें कि वेद में धर्ममय यज्ञ-यागों के साथ कहीं-कहीं हिंसात्मक यागों का उपदेश उपलब्ध होता है अतः अधर्म मिश्रित धर्म का उपदेश देने के कारण ईश्वर पिता के समान हितकारी नहीं है, तो यह धारणा ठीक नहीं; क्योंकि ऐसी बातें अत्यल्प हैं और वह भी हिंसकों की बसी हुई हिंसा वृत्ति को उन-उन यज्ञों में ही सीमित करके धीरे-धीरे काम करने के लिए ही ऐसी बातें कही गयी हैं। वस्तुतः तो हिंसा का निषेध ही वेद का अभीष्ट मत है—मा हिंस्यात् सर्वभूतानि ॥ ९० ॥

अथायमीश्वरो नैव हितः पितृसमो यतः।
पापसाधनहिंसाभिर्मिश्रयागोपदेशनात् ॥

इति चेन्न प्रधानांशफलसौख्याद्यपेक्षया।
अङ्गहिंसाफलाल्पत्वान्नाहितस्तद्विधानकृत् ॥
ननु क्रत्वङ्गहिंसायाः प्रधानैकफलत्वतः।
न सामान्यनिषेधस्य विषयत्वं प्रसज्यते ॥
कुर्यान्न कुर्यादित्येवं विकल्पस्त्वन्यथा भवेत्।
तस्माद्विशेषादन्यत्र स्याद्यदाहवनीयवत् ॥
अत्रोच्यतेऽङ्गहिंसायाः स्यादपूर्वस्य हेतुता।
पापहेतुश्च सामान्यहिंसेत्येवाऽविरोधिता ॥
अथ प्रबलदुःखस्याननुबन्धीष्टहेतुता।
विध्यर्थोऽयं नञा युक्तस्तदभावस्य बोधकः ॥
तथा च सर्वान् मा हिंस्यादस्य दुःखाद्यहेतुता।
सत्यं यागाङ्गहिंसातो यद्दुःखं प्रबलं न तत् ॥
प्रधानफलसौख्यादेर्नैयत्यान्नान्तरीयकम्।
अन्यथातिप्रसङ्गः स्यात् प्रबलत्वानिरुक्तितः ॥
तस्माज्जातिविशेषोऽयं दुःखेषु प्रबलत्वता।
प्रायश्चित्तादिमरणे प्रयागमरणेऽपि वा ॥
आत्महत्याकृतं दुःखं तत्फलापेक्षया लघु।
अतः प्रत्यवमर्शं हि प्राह पञ्चशिखोऽपि तत् ॥
स्वल्पत्वान्न बलीयस्त्वाद्यत्र दुःखस्य गौरवम्।
पर्यग्निकरणोत्सर्गास्तत्र श्रुत्यैव दर्शिताः ॥
पञ्चसूना गृहस्थानामिति स्मृतिषु चोदितम्।
न सामान्यविशेषोक्तिर्न शून्ये सुतरां यथा ॥
रङ्गोपजीवी पशुहा नरकं शरणं व्रजेत् ॥
श्रुतिप्रसङ्गाच्छ्रौतानामपूर्वमथ चिन्त्यते।
कर्तृभोक्तृगतं तत् किमथवा परमेश्वरे ॥ इति ॥ ९० ॥

फलमस्माद्बादरायणो दृष्टत्वात् (७) ॥ ९१ ॥

कर्मों का फल ईश्वर से ही प्राप्त होता है स्वतः नहीं; क्योंकि लोक में ऐसा देखा गया है—जैसे कोई व्यक्ति अपने कार्य द्वारा यदि राजा आदि को सन्तुष्ट करता है तो पुरस्कार पाता है और अपने दुर्व्यवहार से रुष्ट करता है तो दण्ड का भागी होता है। इसी प्रकार ईश्वर ही शुभाशुभ कर्मों

का सुख-दुःख रूप फल देते हैं। यह भगवान् बादरायण व्यास जी ने अपने ब्रह्मसूत्र में स्पष्ट की है ॥ ९१ ॥

राजादिरोषतोषाभ्यां दृष्टत्वात् कर्मणां फलम् ।
अस्माद् ब्रह्मण एवाह भगवान् वादरायणः ॥
तन्न कर्तृगतं पुत्रे जातेष्टिफलदर्शनात् ।
अथ भोक्तृगतो भोगः कस्मिन्नित्येव चिन्त्यते ॥

अन्योन्याश्रय एव स्यादुभयोः स्वव्यपेक्षणात् ।
तस्माददृष्टतया रोषतोषाभ्यां परमेशितुः ॥
हिताहितफलप्राप्तिः फलोद्देश्यगता भवेत् ।
नाप्युद्देश्यगतत्वेन व्यापारान्तरकल्पनम् ॥
अन्यथा राजसेवादावप्यपूर्वं प्रसज्यते ।
अत एवेश्वरप्रीतिप्रदत्वं कर्मणां श्रुतम् ॥
ये तु धर्मामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥
रोषतोषादिसत्त्वेऽपि न संसारित्वमीशितुः ।
तद्वृत्तत्वाददुःखत्वान्नित्यमुक्ततयापि च ॥इति॥ ९१ ॥

व्युत्क्रमादप्ययस्तथा दृष्टम् (८) ॥ ९२ ॥

विपरीत क्रम से भूतों का अपने कारण में लय होता है, जिस प्रकार घर फूटने अपने कारण मिट्टी में ही लीन होता है उसी प्रकार प्रत्येक व्याप्य वस्तु अपने व्यापक कारण में विलीन होती है जैसे पृथ्वी का जल में, जल का अग्नि में, अग्नि का वायु में, वायु का आकाश में लय होता है ॥ ९२ ॥

प्रलयो व्याप्यतत्त्वानां व्यापकेपूक्तमान्मतः ।
व्यापिकायां मृदि व्याप्यघटादिलयदर्शनात् ॥ इति ॥ ९२ ॥

इत्याचार्यश्रीस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यभक्तिसूत्रभाष्ये
तृतीयाध्यायस्य प्रथममाह्निकम् ॥ १ ॥

—:※:—

तृतीयाध्यायस्य द्वितीयाह्निकम्

जीवस्य ब्रह्मभावो हि मुक्तिरित्यभिधीयते ।
तद्विवेकतयात्रापि भजनीयविवेचनम् ॥

अन्यस्य कथमन्यत्वं घटेतेति वितर्कयन् ।
जीवानां भगवद्भावे योग्यतामाह सूत्रकृत् ॥

तदैक्यं नानात्वैकत्वमुपाधियोगहानादादित्यवत् (१) ॥ ९३ ॥

जीव तथा ईश्वर में एकता है—दोनों एक हैं, उपाधि संयोग से उनमें नानात्व की प्रतीति होती है और उपाधि भङ्ग हो जाने पर एकत्व का बोध स्पष्ट हो जाता है। ठीक उसी तरह जैसे एक ही सूर्य जल से भरे हुए भिन्न-भिन्न पात्रों में पृथक्-पृथक् प्रतिबिम्बित होने पर अनेक-सा प्रतीत होता है; किन्तु जलपात्र रूप उपाधि के न रहने पर वह पुनः एक ही रहता है ॥ ९३ ॥

"सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन"[१]—

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।[२]

इत्यादिभिस्तस्यैकत्वमेव स्वभावः। उभयथा चात्मप्रत्ययः स जीवोपाधिबुद्धिरात्मानुकृतः। तथा च श्रुतिः—"एकधा बहुधा चैव दृश्यते जलचन्द्रवत्"[३]।

सितनीलादिभेदेन यथैकं दृश्यते नभः ।
भ्रान्तदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक् ॥[४] इति ॥

ततः परभक्तया जीवोपाधिबुद्धिहाने सति पुनरेकत्वमप्यविरुद्धम् यथादित्यस्य प्रकाशात्मनः प्रतिबिम्बोपाधिदर्पणाद्यपगमे तद्वत् ॥ ९३ ॥

पृथगिति चेन्न परेणासम्बन्धात् प्रकाशानाम् (२) ॥ ९४ ॥

यदि कहें जीव में बद्ध-मुक्त आदि का भेद दिखाई देने के कारण यह सिद्ध है कि जीव ईश्वर से सर्वथा भिन्न है तो यह ठीक नहीं; क्योंकि स्वयं प्रकाश परमात्मा के साथ उन्हीं के प्रकाश स्वरूप जीवों का द्रष्टा दृश्य के रूप में सम्बन्ध नहीं हो सकता। अतः चैतन्य प्रकाश रूप से सभी जीव ईश्वर से अभिन्न हैं। बद्ध-मुक्त आदि की कल्पना करने वाली तो बुद्धि है जो अज्ञानवश ऐसी कल्पना कर लेती है ॥ ९४ ॥

पृथगेव परस्परमत्यन्तभिन्नाः प्रकाशात्मान एव जीवाः, अन्यथा कश्चिन्मुक्तः कश्चिद्बद्ध इति व्यवस्था न स्यादिति चेत्? न, कथञ्चिदनीश्वरसाङ्ख्यानां तथा

---

(१) छा० उ० ३।१४।१। (२) गीता १३।३३। (३) वे० क० ५।३।
(४) वि० पु० २।१६।१२।

सम्भवेऽपि सेश्वरसाङ्ख्यानां तदसम्भवात्। कथम्? प्रकाशात्मनां परेण परमेश्वरेण सह द्रष्टृत्वदृश्यत्वलक्षणसम्बन्धाभावात् तेषां स्वप्रकाशतयादित्येनेव प्रदीपानामप्रकाशनात्। तथा चानीश्वरत्वमसर्वज्ञत्वं ज्ञेयत्वं च ब्रह्मणः स्यात्। अथ प्रकाश्यास्तेषां जाड्यप्रसङ्गान्नापि मिथो बुद्धिवृत्त्या प्रकाश्यत्वम्। तद्धि तमोऽभिभूत्यैव नैवान्तःकरणसत्त्ववृत्त्या, न च तदयोग्यत्वे तत् सम्भवति। न खल्वावरणनिवृत्तावपि दीपो दीपान्तरप्रकाश्य इति वाह्याभ्यन्तरप्रकाशयोः कश्चिदीपाधिकोऽप्येकधर्मो येन—"स्वयं ज्योतिरेवायं पुरुषः"[1] इत्यादौ गौणो ज्योतिःशब्दः। तस्माच्चिदात्मा जगत्प्रकाशकत्वेनैव सिध्यतीति न तत्र परापेक्षा। किञ्च, मनोधर्मभ्रमतत्त्वधियोरधिष्ठानतया चात्मसिद्धिरप्रत्यूहैव बुद्धिवृत्तीनां तु गौण एव ज्ञानत्वसुखत्वव्यवहारः।

किं मानमात्मनां भेदे बुद्धितत्त्वभिदा स्थिता।
बन्धमोक्षव्यवस्थाने नित्यमुक्तात्मनां कुतः॥ इति ॥९०॥

अथ विकारिण एव सत्तात्मानो ज्ञानेच्छादयस्तद्गुणाः जानामीच्छामि सुखीत्यादिप्रत्ययादिति मतं निरस्यन्नाह—

न विकारिणस्तु जीवाः कारणविकारात् (३) ॥ ९५ ॥

जीवों में ज्ञान, सुख, दुःख, इच्छा आदि गुण या विकार होने के कारण उन्हें विकारी कह सकते हैं। फिर अविकारी परमात्मा से उनकी एकता कैसी? इसके उत्तर में कहते हैं जीवात्मा विकारी नहीं है; क्योंकि सुख-दुःख आदि विकार तो अन्तःकरण से सम्बन्ध रखते हैं आत्मा से नहीं ॥ ९५ ॥

न ज्ञानादिविकारवन्त आत्मानो भवितुमर्हन्ति, कुतः? सुखोपलम्भादेः करणगतत्वेन ज्ञानादीनामुपपत्तेरात्मनामविकारित्वात्। तथा हि सुखोपलब्धिः सकरणिकेत्याद्यनुमाने तादृशकरणासम्बन्धस्य तादात्म्येन सत्त्वात् सुखादयो नात्मविकाराः, आत्मनि प्रतीतत्वाद् गौरत्वादिवदित्यनुमानाच्च। एवमहन्त्वस्यापि कारणतादात्म्येनैव मनसा ग्रहणम्। सुषुप्तौ मनोलये तदग्रहणम्। कालोपाधीनां कालत्ववदिति दिक् ॥ ९५ ॥

अनन्यभक्त्या तद्बुद्धिर्बुद्धिलयादत्यन्तम् (४) ॥ ९६ ॥

अनन्य भक्ति के द्वारा बुद्धि का आत्यन्तिक लय होने से परमात्मा का साक्षात्कार रूप बोध (मोक्ष) प्राप्त होता है ॥ ९६ ॥

---

(१) बृ० उ० ४।३।५।

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥[१]

इति श्रुतम् । तथा—"भक्त्यैकलभ्ये पुरुषे पुराणे मुक्तौ किमर्थं क्रियते न यत्नः"[२] इति । तस्मात् परभक्तिमात्रेण बुद्धेरत्यन्तलये सति ब्रह्मानन्दावाप्तिलक्षणा मुक्तिरित्यर्थः । तथा च तदीयबुद्धिविलयप्रागभावसहवृत्तिब्रह्मानन्दावाप्तिर्मुक्तिरिति तल्लक्षणं सूचितम् । अथ ब्रह्मानन्दावाप्तेः सिद्धत्वेनापुरुषार्थत्वमिति चेन्न, ग्रामादिवद्विशिष्टतया पुमर्थत्वात् । अत्र बुद्धिर्जीवोपाधिर्मता, भगवत एव बुद्धितत्त्वाभ्युपगमात् । अन्यथा इदं सुखमत्र सुखत्वमिति ज्ञानाज्जातेर्नित्यतया तद्विशिष्टस्य पुमर्थाभावप्रसङ्गात्, ईहाकृत्योर्विकल्पकत्वाभावात् । तस्मादसिद्धोपरागेण सिद्धे अपीच्छाकृती इति । कृत्यसाध्यत्वज्ञानं प्रतिबन्धकमिति चेत् ? श्येनादौ बलवदनिष्टानुबन्धित्वतिरोधानादिवोत्कटरागेण कृत्यसाध्यत्वमपि तिरोधाय प्रवर्तितमिति किमनुपपन्नम् ? आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमित्यागमादपि तथात्वमध्यवसेयमिति ॥ ९६ ॥

अथ परभक्तिसिद्धौ जीवनादृष्टभोगवदितरेषामपूर्वाणामपि भोगेनैव लय इत्यनिर्मोक्ष एव स्यादित्यत उच्यते—

आयुश्चिरमितरेषां तु हानिरनास्पदत्वात् (५) ॥ ९७ ॥

पराभक्ति सिद्ध होने पर भक्त को भगवत्प्राप्ति या मुक्ति में तभी तक विलम्ब है जब तक उसकी आयु शेष है । क्रियमाण एवं सञ्चित आदि के रूप में जो अन्य शुभाशुभ कर्म हैं जिनके कारण शरीर धारण करना पड़ता है । उन सबका लय हो जाता है; क्योंकि पराभक्ति से जीवन के अदृष्टमात्र का लय होकर जब बुद्धि का भी आत्यन्तिक लय होता है तब कर्मफल भोग का कोई आधार ही नहीं रह जाता है ॥ ९७ ॥

आत्मरतौ सत्याम्—"तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ सम्पत्स्ये"[३] इति । तथा—

धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ॥[४]

तथा च आयुर्जीवनादृष्टं तन्मात्रमेव चिरं परभक्तौ सत्यामपि मुक्तिप्रतिबन्धकं तावदेव जीवन्मुक्तिः । इतरेषां धर्माधर्माणां जीवनादृष्टलये सति बुद्धेरत्यन्तलये

(१) गीता ८।२२ । (२) नृ० पु० ५।२१ । (३) छा० उ० ६।१४।२ ।
(४) वि० पु० १।२०।२० ।

भोगास्पदस्याभावाद् बुद्धिभोगाभाव एवेति नानिर्मोक्ष इति बुद्धेरपि विकार्यत्वेन कारणत्वात् । नापि तददृष्टाहेतुत्वं कारणान्तराभावे फलानिष्पत्तावपि हेतुत्वाक्षतेः । तस्य भगवत्तोपरोपरूपस्यापि लयः कालात् प्रलयसामग्रीतो वा यथाङ्गापूर्वाणामङ्गवैगुण्यादजनितपरमापूर्वाणां लय इति । ब्रह्मार्पणं तु प्रतिबन्धकीभूतकर्मणामबन्धायेति सर्वमनवद्यम् । परंपरयैव ज्ञानाग्निना कर्मक्षय इति ॥ ९७ ॥

संसृतिरेषामभक्तिः स्यान्नाज्ञानात् कारणासिद्धेः (६) ॥ ९८ ॥

जीव का संसारबन्धन भक्ति न होने के कारण ही है। भगवान् की माया से ही जीव बन्धन में बँधे हैं, भक्त पुरुष ही उस माया को जीत कर बन्धन मुक्त हो सकते हैं; अतः जब तक भक्ति का उदय नहीं होता तभी तक बन्धन है। अज्ञान से जीव संसार बन्धन में पड़ा है, यह धारणा ठीक नहीं है; क्योंकि अज्ञान रूप कारण अस्तित्व ही सिद्ध नहीं होता है। अज्ञान का सर्वथा अभाव किसी को भी प्रतीत नहीं होता है; कुछ न कुछ ज्ञान सभी जीवों को रहता है। अतः बन्धन का कारण अज्ञान है यह मान्यता भ्रमपूर्ण है ॥ ९८ ॥

अथ जीवस्य संसारः किमज्ञानकृतो मतः ।
उताभक्तिकृतस्तत्र सूत्रमेतत् प्रवर्तते ॥
स्वर्गोऽथ जीवन्मुक्तत्वं मुक्तिरेषां त्रयी गतिः ।
जीवन्मुक्तिः परा भक्तिस्तदसिद्धिस्तु संसृतिः ॥
सापि भक्तेः कामनानामभावादेव तिष्ठति ।
भक्तौ सत्यां निवर्तेत तथा चोक्तं महर्षिभिः ॥
तावदार्तिस्तु सा वाञ्छा तावन्मोहस्तथा सुखम् ।
यावन्नायाति शरणं त्वामशेषाघमोचनम् ॥[1]
तत्त्वाज्ञानकृता सृष्टिर्ज्ञानात्तद्धानिरिष्यते ।
रज्जुसर्पादिहेतूनामभावात् तदसम्भवात् ॥

जन्मानि घोरयमकिङ्करताडनानि
दैन्यानि तानि तपनात्मजदर्शनानि ।
जन्तोरहंममतरङ्गकुरङ्गतृष्णा-
कृष्णाङ्घ्रिपङ्कजपराङ्मुखतानुभावः ॥ इति ॥ ९८ ॥

---

(१) वि० पु० १।९।७२ ।

त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदाद्रुद्रवत् (७) ॥ ९९ ॥

वस्तु तत्त्व को समझाने के लिए भगवान् शिव के समान जीवों को तीन भिन्न-भिन्न नेत्र हैं—(१) शब्द (वेदादि शास्त्र एवं आप्त वाक्य) (२) लिङ्ग (अनुमान) और (३) प्रत्यक्ष ॥ ९९ ॥

एषां जीवानां त्रीणि नयनानि साधनानि अर्थप्रमितौ प्रमाणभूतानीति यावत् । प्रमितत्वाविशेषेऽपि करणत्रैविध्यात् त्रैविध्यम् । तानि यथा ज्ञानमानयोग्यपदपदार्थरूपः शब्दः शब्दप्रमाकरणम् । तस्य प्रथममभिधानमलौकिकभक्तेस्तत्साधनतादौ प्राधान्यकथनार्थम् । तथा ज्ञायमानव्याप्यपक्षधर्मलिङ्गज्ञानमनुमितिकरणमस्माकं तत्कार्यत्वाज्ज्ञायमानत्वमप्यविरुद्धम् । प्रत्यक्षप्रमितिकरणान्यक्षाणि विषयसम्बद्धानि तानि च मनःश्रोत्रत्वक्चक्षूरसनघ्राणानि षट् स्वसम्बन्धेनान्तःकरणस्य तमोऽभिभूय चिदात्मप्रकाशमानार्थाकारां सत्त्ववृत्तिं जनयन्ति, अत एवोक्तम्—"सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते"[१] इति । जीवबुद्धिरूपमनसो दुःखादिविकारास्तु नाज्ञाताः सन्तीत्यात्मप्रकाशेनैव प्रकाश्यन्त इति न तत्र सत्त्ववृत्त्यवकल्पनं गौरवात् । एतदेव साक्षिभास्वत्वम् । एवं शब्दानुमानप्रत्यक्षभेदात् त्रीण्येव यथा रुद्रस्य त्रीणि चक्षुरधिष्ठानानि नाधिकानि न न्यूनानि, तद्वच्चन्द्रसूर्याग्निरूपत्वचिह्नानि । उपमानं तु शक्तिग्रहमात्रार्थम्, तच्च सामान्यतो दृष्टानुमानसहकारेण प्रसिद्धपदसामानाधिकरण्यात् कविकाव्यपरिच्छेदवन्मनसापि सम्भवतीति त्रिष्वेवान्तर्भूतमिति न पृथक् । प्रमाणविचारोऽस्माभिर्न्यायतत्त्वनिकषे वेदान्ततत्त्वनिकषे च निरूपित इति नेह प्रतन्यते ।

जीवबुद्धिर्मनो नाम तत् सङ्कोचविकासवत् ।
यौगपद्यायौगपद्ये धियां तेनोपपद्यते ॥
ईश्वराऽहंकृतेर्जीवबुद्धीनामुद्भवो यतः ।
बुद्धौ दुःखादिवत् साक्षादहन्त्वमपि गृह्यते ॥
मात्राभूतेन्द्रियादीनां भगवद्बुद्धिजन्मतः ।
भगवद्बुद्धिबोद्धृत्वाच्चिदाग्राह्यं तथेन्द्रियैः ॥
भूतानि पञ्च तन्मात्राः पञ्च चैकादशेन्द्रियम् ।
अहम्बुद्धिप्रधानात्मपरेशास्तत्त्वसंग्रहः ॥

इति षड्विंशतितत्त्वानि ॥ ९९ ॥

---

(१) गीता १४।११ ।

आविस्तरोभावाविकाराः स्युः क्रियाफलसंयोगात् (८) ॥ १०० ॥

उत्पत्ति, विनाश आदि जो छः भाव विकार हैं वे आविर्भाव तिरोभाव रूप ही हैं—किसी स्थान या काल विशेष में एक वस्तु का प्रकट होना और उसका छिप जाना ही उन विकारों का स्वरूप है; क्योंकि उनके द्वारा क्रियाफल का संयोगमात्र होता है। किसी नूतन वस्तु की उत्पत्ति नहीं। उत्पत्ति क्रिया का फल है प्रगट होना, विनाश का फल है अदृश्य होना। इन क्रियाफलों का स्थान या काल विशेष से जो संयोग होता है, उसी को उत्पत्ति का विनाश कहते हैं। इसी प्रकार क्षय-वृद्धि आदि विकार भी अवस्था विशेष के प्रादुर्भाव और तिरोभाव के ही सूचक हैं। पराभक्ति से तत्त्व ज्ञान का उदय होने पर विकार बुद्धि का लय हो जाता है और सर्वत्र परमात्मा का साक्षात्कार होने लगता है अतः भक्ति का ही आश्रय लेना चाहिए ॥ १०० ॥

प्रसङ्गादुत्पत्तिलयौ चिन्त्येते, तत्रोत्पत्तिराविर्भावलक्षणा सत एव क्रियायोग्यता, तथा तिरोभावस्तदयोग्यता, एवं वृद्धिहानादयो विकार एव भवन्ति। कुतः ? करोति घटं नाशयति घटमित्यादौ धात्वर्थफलसम्बन्धव्यपदेशात्। ते च सत एव घटन्ते नासतः। तथा चोक्तम्—"नासतो विद्यते भावो नाभावो विद्यते सतः"[1] इति। एवं भवति नश्यतीत्यादावपि क्रियाश्रयत्वं प्रतीयते। तच्च सत एव सम्भवति। स चाद्यक्षणसम्बन्धो नाशप्रतियोगित्वं च तदर्थः, आद्यत्वस्यानिरुक्तेः। न चाविर्भावस्याविर्भावान्तरावश्यकत्वेऽनवस्थागौरवयोरन्यतरप्रसङ्गः, घटसामग्र्या एवाविर्भावस्याविर्भावत्वात्। अन्यथा उत्पत्तेरुत्पत्तावपि तथात्वप्रसङ्गात्। एवञ्च घटस्य पूर्वपूर्वाविर्भावतिरोभावपरम्परैव प्रागभावस्तिरोभाव एव नाशः। स च कदाचिदात्यन्तिकोऽपि, यथा देवदत्तशरीरस्य, यथा वा मुक्तबुद्ध्यादीनाम्। अन्योन्यात्यन्ताभावौ च परस्परविरुद्धधर्मतदधिकरणयोर्नातिरिच्येते। अन्यथा भावेऽप्यभावान्तरस्वीकारप्रसङ्गादिति प्रलये तु प्रलयाख्यविकारातिरिक्तस्य विकारस्याभाव एव। संस्कारास्तु सूक्ष्मात्मना तिष्ठन्तीति न कोऽपि दोषः। पर्यवसिता त्रिलक्षणी भक्तिमीमांसा ॥

परिवीतपीतवसनं घनोपमं शतपत्रपत्रसदृशायते क्षणम्।
धृतवेणुरेणुपरमण्डितं गवां हृदि वोऽस्तु कौस्तुभविभूषणं महः ॥

---

(१) गीता २।१६।

गौडक्ष्मावलये विशारद इति ख्यातादभूद्भूमणेः
सर्वोर्वीपतिसार्वभौमपदभाक् प्रज्ञावतामग्रणीः ।
तस्मादास जलेश्वरो बुधवरः सेनाधिपः क्ष्माभृतां
स्वप्नेशेन कृतं तदङ्गजनुषा सद्भक्तिमीमांसनम् ॥

इति श्रीस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यभक्तिसूत्रभाष्ये
तृतीयस्याध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

—:०:—

महर्षिशाण्डिल्यप्रणीतानि भक्तिसूत्राणि ।

[किन्तु भाष्ये पाठान्तरयुक्तानि कानिचित् सूत्राणि प्रतिपृष्ठमधः टिप्पण्यां प्रदीयन्ते ।]

❀

अथ प्रथमोऽध्यायः	पृष्ठ सं०
१ अथातो भक्तिजिज्ञासा ॥ १ ॥	३
२ सा पराऽनुरक्तिरीश्वरे ॥ २ ॥	३
३ तत्संस्थस्यामृतत्वोपदेशात् ॥ ३ ॥	५
४ ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः ॥ ४ ॥	५
५ तयोपक्षयाच्च ॥ ५ ॥	६
६ द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः ॥ ६ ॥	६
७ न क्रिया कृत्यनपेक्षणाज्ज्ञानवत् ॥ ७ ॥	८
८ अत एव फलानन्त्यम् ॥ ८ ॥	९
९ तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत् ॥ ९ ॥	९
इति प्रथमाध्याये प्रथममाह्निकम्	
१० सा मुख्येतरापेक्षितत्वात् ॥ १ ॥	१०
११ प्रकरणात् ॥ २ ॥	११
१२ दर्शनफलमिति चेन्न, तेन व्यवधानात् ॥ ३ ॥	११
१३ दृष्टत्वाच्च ॥ ४ ॥	११
१४ अत एव तद्भावाद्वल्लवीनाम् ॥ ५ ॥	१२
१५ भक्त्या जानातीति चेन्नाभिज्ञप्त्यसाहाय्यात् ॥ ६ ॥	१३
१६ प्रागुक्तञ्च ॥ ७ ॥	१३

(११) प्रकरणाच्च । (१५) भक्त्या जानातीति चेन्नाऽभिज्ञप्त्या साहाय्यात् ।

५

१७	एतेन विकल्पोऽपि प्रत्युक्तः ॥ ८ ॥	१४
१८	देवभक्तिरितरस्मिन् साहचर्यात् ॥ ९ ॥	१४
१९	भक्तिः प्रमेया श्रुतिभ्यः* ॥ १० ॥	
२०	पुराणेतिहासाभ्याञ्चेति* ॥ ११ ॥	
२१	पृथुध्रुवप्रह्लादाम्बरीषशुकसनकनारदभजनाचाराच्च* ॥ १२ ॥	
२२	योगस्तूभयार्थमपेक्षणात् प्रयाजवत् ॥ १३ ॥	१४
२३	गौण्या तु समाधिसिद्धिः ॥ १३ ॥ ११	१५
२४	हेया रागत्वादिति चेन्नोत्तमास्पदत्वात् सङ्गवत् ॥ १४ ॥१२	१५
२५	तदेव कर्मिज्ञानियोगिभ्य आधिक्यशब्दात् ॥ १५ ॥१३	१६
२६	प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः ॥ १६ ॥१४	१६
२७	नैव श्रद्धा तु साधारण्यात् ॥ १७ ॥१५	१७
२८	तस्यां तत्त्वे चानवस्थानात् ॥ १८ ॥१६	१७
२९	ब्रह्मकाण्डं तु भक्तौ तस्यानुज्ञानाय सामान्यात् ॥ १९ ॥१७	१७
	इति प्रथमाध्याये द्वितीयमाह्निकम् ।	
	अथ द्वितीयोऽध्यायः ।	
३०	बुद्धिहेतुप्रवृत्तिराविशुद्धेरवघातवत् ॥ १ ॥	१८
३१	तदङ्गानां च ॥ २ ॥	१९
३२	तामैश्वर्यपरां काश्यपः परत्वात् ॥ ३ ॥	१९
३३	आत्मैकपदां बादरायणः ॥ ४ ॥	१९
३४	उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्याम् ॥ ५ ॥	१९
३५	वैषम्यादसिद्धमिति चेन्न प्रत्यभिज्ञावदवैशिष्ट्यात् ॥ ६ ॥	२०
३६	न च क्लिष्टः परः स्यादनन्तरं विशेषात् ॥ ७ ॥	२१
३७	ऐश्वर्यं तथेति चेन्न स्वाभाव्यात् ॥ ८ ॥	२१
३८	अप्रतिषिद्धं परैश्वर्यं तद्भावाच्च नैवमितरेषाम् ॥ ९ ॥	२१
३९	सर्वानृते किमिति चेन्नैवम्बुद्ध्यानन्त्यात् ॥ १० ॥	२२
४०	प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनानुवर्तनात् ॥ ११ ॥	२२
४१	तत्प्रतिष्ठा गृहपीठवत् ॥ १२ ॥	२३

१७. भाष्ये १६ संख्याकं प्रागुक्तश्चेति सूत्रं भिन्नं वर्तते । अपि च एतच्चिह्नितानि १८. १९. २० संख्याकानि त्रीणि सूत्राणि भाष्ये न व्याख्यातानि सन्ति अतः सूत्रपाठानुसारं १०२ परं भाष्यानुसारं १०० एव सूत्राणि ज्ञेयानि । (३२) तामैश्वर्यपरां काश्यपः । (३३) आत्मैकपरां बादरायणः । (३४) उभयपरां शाण्डिल्यः परत्वात् । (३५) वैषम्यादसिद्धमिति चेन्नाभिज्ञानपदवैशिष्ट्यात् । (४०) प्रकृत्यन्तरालादभैकार्यं चित्सत्त्वेनानुवर्तमानात् ।

४२ मिथोऽपेक्षणादुभयम् ॥ १३ ॥ २३
४३ चेत्याचितोर्न तृतीयम् ॥ १४ ॥ २४
४४ युक्तौ च सम्परायात् ॥ १५ ॥ २४
४५ शक्तित्वान्नानृतं चेत्यम् ॥ १६ ॥ २४
४६ तत्परिशुद्धिश्च गम्या लोकवल्लिङ्गेभ्यः ॥ १७ ॥ २५
४७ सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनि च स्मरणेभ्यो बाहुल्यात् ॥ १८ ॥ २५
४८ द्वेषादयस्तु नैवम् ॥ १९ ॥ २७
४९ तद्वाक्यशेषात् प्रादुर्भावेष्वपि सा ॥ २० ॥ २८
५० जन्मकर्मविदश्चाजन्मने शब्दात् ॥ २१ ॥ २८
५१ तच्च दिव्यं स्वशक्तिमात्रोद्भवात् ॥ २२ ॥ २८
५२ मुख्यं तस्य हि कारुण्यम् ॥ २३ ॥ २९
५३ प्राणित्वान्न विभूतिषु ॥ २४ ॥ ३०
५४ द्यूतराजसेवयोः प्रतिषेधाच्च ॥ २५ ॥ ३०
५५ वासुदेवेऽपीति चेन्नाकारमात्रत्वात् ॥ २६ ॥ ३०
५६ प्रत्यभिज्ञानाच्च ॥ २७ ॥ ३१
५७ वृष्णिषु श्रैष्ठ्येन तत् ॥ २८ ॥ ३१
५८ एवं प्रसिद्धेषु च ॥ २९ ॥ ३२

इति द्वितीयाध्याये प्रथममाह्निकम् ।

---

५९ भक्त्या भजनोपसंहाराद्गौण्या परायै तद्धेतुत्वात् ॥ १ ॥ ३२
६० रागार्थं प्रकीर्तिसाहचर्याच्चेतरेषाम् ॥ २ ॥ ३३
६१ अन्तराले तु शेषाः स्युरुपास्त्यादौ च काण्डत्वात् ॥ ३ ॥ ३४
६२ ताभ्यः पावित्र्यमुपक्रमात् ॥ ४ ॥ ३५
६३ तासु प्रधानयोगात् फलाधिक्यमेके ॥ ५ ॥ ३६
६४ नाम्नेति जैमिनिः सम्भवात् ॥ ६ ॥ ३६
६५ अत्राङ्गयोगानां यथाकालसम्भवो गृहादिवत् ॥ ७ ॥ ३६
६६ ईश्वरतुष्टेरेकोऽपि बली ॥ ८ ॥ ३६

---

(४५) शक्तित्वान्नानृतं वेद्यम् । (५०) जन्मकर्मविदश्चाजन्मशब्दात् ।
(५२) मुख्यं तस्य हि कारुण्यम् । (६५) अत्राङ्गप्रयोगाणां यथाकालसंभवो गृहादिवत् ।

६७ अवन्धोऽर्पणस्य मुखम् ॥ ९ ॥ ३७
६८ ध्याननियमस्तु दृष्टसौकर्यात् ॥ १० ॥ ३८
६९ तद्यजिः पूजायामितरेषां नैवम् ॥ ११ ॥ ३८
७० पादोदकं तु पाद्यमव्याप्तेः ॥ १२ ॥ ३९
७१ स्वयमर्प्यपितं ग्राह्यमविशेषात् ॥ १३ ॥ ४०
७२ निमित्तगुणाव्यपेक्षणादपराधेषु व्यवस्था ॥ १४ ॥ ४०
७३ पत्रादेर्दानमन्यथा हि वैशिष्टयम् ॥ १५ ॥ ४१
७४ सुकृतजत्वात् परहेतुभावाच्च क्रियासु श्रेयस्यः ॥ १६ ॥ ४१
७५ गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम् ॥ १७ ॥ ४२
७६ बहिरन्तस्थमुभयमवेष्टिसववत् ॥ १८ ॥ ४३
७७ स्मृतिकीर्त्यो कथादेश्चार्तौ प्रायश्चित्तभावात् ॥ १९ ॥ ४३
७८ भूयसामननुष्ठितिरिति चेदाप्रयाणमुपसंहारान्महत्स्वपि ॥ २० ॥ ४४
७९ लघ्वपि भक्तयधिकारे महत्क्षेपकमपरसर्वहानात् ॥ २१ ॥ ४५
८० तत्स्थानत्वादनन्यधर्मः खले वालीवत् ॥ २२ ॥ ४६
८१ आनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत् ॥ २३ ॥ ४७
८२ अतो ह्यविपक्वभावानामपि तल्लोके ॥ २४ ॥ ४८
८३ क्रमैकगत्युपपत्तेस्तु ॥ २५ ॥ ४९
८४ उत्क्रान्तिवाक्यशेषाच्च ॥ २६ ॥ ४९
८५ महापातकिनां त्वार्तौ ॥ २७ ॥ ५०
८६ सैकान्तभावे गीतार्थप्रत्यभिज्ञानात् ॥ २८ ॥ ५१
८९ परां कृत्वैव सर्वेषां तथाह्याह ॥ २९ ॥ ५१

इति द्वितीयाध्याये द्वितीयमाह्निकम् ।

अथ तृतीयोऽध्यायः

८७ भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्स्वरूपत्वात् ॥ १ ॥ ५२
८८ तच्छक्तिर्माया जडसामान्यात् ॥ २ ॥ ५३

---

(७१) स्वयमर्पितं ग्राह्यमविशेषात् । (७४) सुकृतजत्वात् परहेतुभावाच्च क्रियासु ताः श्रेयस्यः । (७५) गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात्साहचर्यम् । (७९) लघ्वपि भक्ताधिकारे महत्क्षेपकमपरसर्वहानात् । (८४) उत्क्रान्तिस्मृतिवाक्यशेषाच्च । (८६) सैकान्तभावो गीतार्थप्रत्यभिज्ञानात् ।

९० व्यापकत्वादव्याप्यानाम् ॥ ३ ॥ ५३

९१ न प्राणिबुद्धिभ्योऽसम्भवात् ॥ ४ ॥ ५५

९२ निर्मायोच्चवचं श्रुतीश्च निर्मिमीते पितृवत् ॥ ५ ॥ ५५

९३ मिश्रोपदेशान्नेति चेन्न स्वल्पत्वात् ॥ ६ ॥ ५५

९४ फलमस्माद्बादरायणो दृष्टत्वात् ॥ ७ ॥ ५६

९५ व्युत्क्रमादप्ययस्तथा दृष्टम् ॥ ८ ॥ ५७

इति तृतीयाध्याये प्रथममाह्निकम् ।

---

९६ तदैक्यं नानात्वैकत्वमुपाधियोगहानादादित्यवत् ॥ १ ॥ ५८

९७ पृथगिति चेन्न परेणासम्बन्धात्प्रकाशानाम् ॥ २ ॥ ५८

९८ न विकारिणस्तु कारणविकारात् ॥ ३ ॥ ५९

९९ अनन्यभक्त्या तद्बुद्धिलयादत्यन्तम् ॥ ४ ॥ ५९

१०० आयुश्चिरमितरेषां तु हानिरनास्पदत्वात् ॥ ५ ॥ ६०

१०१ संसृतिरेषामभक्तेः स्यान्नाज्ञानात् कारणासिद्धेः ॥ ६ ॥ ६१

१०२ त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदाद्रुद्रवत् ॥ ७ ॥ ६२

१०३ आविस्तरो भावविकाराः स्युः क्रियाफलसंयोगात् ॥ ८ ॥ ६३

इति तृतीयाध्याये द्वितीयमाह्निकम् ।

❀

---

(९५) व्युत्क्रमादप्ययस्तथा दृष्टम् ।

(९८) न विकारिणस्तु जीवाः कारणविकारात् ।

(९९) अनन्यभक्त्या तद्बुद्धिर्बुद्धिलयादत्यन्तम् ।

(१०१) संसृतिरेषामभक्तिः स्यान्नाज्ञानात् कारणसिद्धेः ।

एवं शाण्डिल्यभक्तिसूत्रे त्रयोऽध्याया विद्यन्ते, प्रत्यध्यायं च द्वे द्वे आह्निके स्तः। तत्र स्वप्नेश्वरभाष्यानुसारं शतसूत्राणि सन्ति। तद्यथा —

१।१—प्रथमाध्यायस्य प्रथमे आह्निके		९	सूत्राणि सन्ति	
१।२— ,,	द्वितीये ,,	१९	,,	,,
२।१—द्वितीयाध्यायस्य प्रथमे	,,	२९	,,	,,
,,	द्वितीये ,,	२९	,,	,,
३।१—तृतीयाध्यायस्य प्रथमे	,,	८	,,	,,
३।२— ,,	द्वितीये ,,	८	,,	,,
		१०२	,,	,,

किन्तु सूत्रपाठे १०२ सूत्राणि वर्तन्ते।

शाण्डिल्यभक्तिसूत्रे निम्नाङ्कितानि विशेषनामघटितानि दशसूत्राणि सन्ति। तानि यथा—

१—अत एव तद्भावाद्वल्लवीनाम् (१।२।५)

२—पुराणेतिहासाभ्याञ्च (१।२।१०)

३—पृथु-ध्रुव-प्रह्लाद-अम्बरीष-शुक-सनन्द-नारद-भजनाचाराश्च (१।२।११)

४—ब्रह्मकाण्डं तु भक्तो तस्यानुज्ञानाय सामान्यात् (१।२।१९)

५—तानैश्वर्यपरां काश्यपः परत्वात् (२।१।३)

६—आत्मैकपदां बादरायणः (२।१।४)

७—उभयपरां शाण्डिल्यः शब्दापपत्तिभ्याम् (२।१।५)

८—नाम्नेति जैमिनिः संभवाद् (२।२।६)

९—सैकान्तभावो गीतार्थप्रत्यभिज्ञानात् (२।२।२८)

१०—फलमस्यादिति बादरायणो दृष्टत्वात् (३।२।६)

परिशिष्टम्

नारदभक्तिसूत्रम्

भक्तेः स्वरूपम्

१. अथातो भक्तिं व्याख्यास्यामः ॥ १ ॥

२. सा त्वस्मिन् परमप्रेमरूपा ॥ २ ॥

३. अमृतस्वरूपा च ॥ ३ ॥

४. यल्लब्ध्वा पुमान् सिद्धो भवत्यमृतो भवति तृप्तो भवति ॥ ४ ॥

५. यत्प्राप्य न किञ्चिद्वाञ्छति, न शोचति, न द्वेष्टि, न रमते, नोत्साही भवति ॥ ५ ॥

६. यज्ज्ञात्वा मत्तो भवति, स्तब्धो भवति, आत्मारामो भवति ॥ ६ ॥

ईश्वरप्रेम्णि अनन्यता

७. सा न कामयमाना निरोधरूपत्वात् ॥ १ ॥

८. निरोधस्तु लोकवेदव्यापारन्यासः ॥ २ ॥

९. तस्मिन्ननन्यता तद्विरोधिषूदासीनता च ॥ ३ ॥

१०. अन्याश्रयाणां त्यागोऽनन्यता ॥ ४ ॥

११. लोके वेदेषु च तदनुकूलाचरणं तद्विरोधिषूदासीनता॰॥ ५ ॥

१२. भवतु निश्चयदार्ढ्यादूर्ध्वं शास्त्ररक्षणम् ॥ ६ ॥

१३. अन्यथा पातित्याशङ्कया ॥ ७ ॥

१४. लोकोऽपि तावदेव, किन्तु भोजनादिव्यापारस्त्वाशरीरधारणावधि ॥ ८ ॥

प्रेमरूपाया भक्तेर्लक्षणानि दृष्टान्ताश्च

१५. तल्लक्षणानि वाच्यन्ते नानामतभेदात् ॥ १ ॥

१६. पूजादिष्वनुराग इति पाराशर्यः ॥ २ ॥

१७. कथादिष्विति गर्गः ॥ ३ ॥

१८. आत्मरत्यविरोधेनेति शाण्डिल्यः ॥ ४ ॥

१९. नारदस्तु तदर्पिताखिलाचारिता तद्विस्मरणे परमव्याकुलतेति ॥ ५ ॥

२०. अस्त्येवमेवम् ॥ ६ ॥
२१. यथा व्रजगोपिकानाम् ॥ ७ ॥
२२. तत्रापि न माहात्म्यज्ञानविस्मृत्यपवादः ॥ ८ ॥
२३. तद्विहीनं जाराणामिव ॥ ९ ॥
२४. नास्त्येव तस्मिँस्तत्सुखसुखित्वम् ॥ १० ॥

प्रेमभक्तेः फलरूपत्वम्

२५. सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा ॥ १ ॥
२६. फलरूपत्वात् ॥ २ ॥
२७. ईश्वरस्याप्यभिमानद्वेषित्वाद्दैन्यप्रियत्वाच्च ॥ ३ ॥
२८. तस्या ज्ञानमेव साधनमित्येके ॥ ४ ॥
२९. अन्योऽन्याश्रयत्वमित्यन्ये ॥ ५ ॥
३०. स्वयं फलरूपतेति ब्रह्मकुमाराः ॥ ६ ॥
३१. राजगृहभोजनादिषु तथैव दृष्टत्वात् ॥ ७ ॥
३२. न तेन राजपरितोषः क्षुच्छान्तिर्वा ॥ ८ ॥
३३. तस्मात् सैव ग्राह्या मुमुक्षुभिः ॥ ९ ॥

भक्तिसाधनानि

३४. तस्याः साधनानि गायन्त्याचार्याः ॥ १ ॥
३५ तत्तु विषयत्यागात् सङ्गत्यागाच्च ॥ २ ॥
३६. अव्यावृतभजनात् ॥ ३ ॥
३७. लोकेऽपि भगवद्गुणश्रवणकीर्तनात् ॥ ४ ॥
३८. मुख्यतस्तु महत्कृपयैव भगवत्कृपालेशाद्वा ॥ ५ ॥

सत्सङ्गमाहात्म्यम्

३९. महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च ॥ ३९ ॥
४०. लभ्यतेऽपि तत्कृपयैव ॥ ४० ॥
४१. तस्मिंस्तज्जने भेदाभावात् ॥ ४१ ॥
४२. तदेव साध्यतां तदेव साध्यताम् ॥ ४२ ॥

दुःसङ्गत्यागः

४३. दुःसङ्गः सर्वथैव त्याज्यः ॥ १ ॥

४४. काम-क्रोध-मोह-स्मृतिभ्रंश-बुद्धिनाश-सर्वनाशकारणत्वात् ॥ २ ॥
४५. तरङ्गायिता अपीमे सङ्गात् समुद्रायन्ति ॥ ३ ॥

मायातरणेऽधिकारी

४६. कस्तरति कस्तरति मायाम् ? यः सङ्गांस्त्यजति,
यो महानुभावं सेवते, निर्ममो भवति ॥ १ ॥
४७. यो विविक्तस्थानं सेवते, यो लोकबन्धमुन्मूलयति;
निस्त्रैगुण्यो भवति, यो योगक्षेमं त्यजति ॥ २ ॥
४८. यः कर्मफलं त्यजति, कर्माणि संन्यसति,
ततो निर्द्वन्द्वो भवति ॥ ३ ॥
४९. यो वेदानपि संन्यसति, केवलमविच्छिन्नानुरागं लभते ॥ ४ ॥
५०. स तरति स तरति, लोकांस्तारयति ॥ ५ ॥

भक्तेः परा-गौणीभेदः

५१. अनिर्वचनीयं प्रेमस्वरूपम् ॥ १ ॥
५२. मूकास्वादनवत् ॥ २ ॥
५३. प्रकाशते क्वापि पात्रे ॥ ३ ॥
५४. गुणरहितं कामनारहितं प्रतिक्षणवर्द्ध-
मानविच्छिन्नं सूक्ष्मतरमनुभवरूपम् ॥ ४ ॥
५५. तत्प्राप्य तदेवावलोकयति, तदेव शृणोति, तदेव चिन्तयति ॥ ५ ॥
५६. गौणी त्रिधा गुणभेदादार्तादिभेदाद्वा ॥ ६ ॥
५७. उत्तरस्मादुत्तरस्मात् पूर्वपूर्वा श्रेयाय भवति ॥ ७ ॥

भक्तेः सौलभ्यं महिमा च

५८. अन्यस्मात् सौलभ्यं भक्तौ ॥ १ ॥
५९. प्रमाणान्तरस्यानपेक्षत्वात् स्वयं प्रमाणत्वात् ॥ २ ॥
६०. शान्तिरूपात् परमानन्दरूपाच्च ॥ ३ ॥

भक्तेः साधनान्तरायौ[1]

६१. लोकहानौ चिन्ता न कार्या, निवेदितात्मलोकवेदत्वात् ॥ १ ॥

---

(१) अत्र त्रिषु सूत्रेषु किञ्चित् पाठभेदोऽप्युपलभ्यते । तद्यथा —
६१. लोकहानौ चिन्ता न कार्या, निवेदितात्मलोकमेदशीलत्वात् (१)
६२. न तत्सिद्धौ लोकव्यवहारो हेयः, किन्तु फलत्यागस्तत्साधनं कार्यमेव (२)
६३. स्त्री-धन-नास्तिक-वैरि चरित्रं न श्रवणीयम् (३)

६२. न तदसिद्धौ लोकव्यवहारो हेयः, किन्तु फलत्यागस्तत्साधनं च कार्यमेव ॥ २ ॥

६३. स्त्री-धन-नास्तिकचरित्रं न श्रवणीयम् ॥ ३ ॥

६४. अभिमान-दम्भादिकं त्याज्यम् ॥ ४ ॥

६५. तदर्पिताखिलाचारः सन् कामक्रोधाभिमानादिकं तस्मिन्नेव करणीयम् ॥ ५ ॥

प्रेमभक्तिस्तुतिः

६६. त्रिरूपभङ्गपूर्वकं नित्यदास्यनित्यकान्ताभजनात्मकं वा प्रेमैव कार्यं प्रेमैव कार्यम् ॥ १ ॥

६७. भक्ता एकान्तिनो मुख्याः ॥ २ ॥

६८. कण्ठावरोधरोमाञ्चाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि पृथ्वीं च ॥ ३ ॥

६९. तीर्थीकुर्वन्ति तीर्थाणि, सुकर्मीकुर्वन्ति कर्माणि, सच्छास्त्रीकुर्वन्ति शास्त्राणि ॥ ४ ॥

७०. यतस्तन्मयाः ॥ ५ ॥

७१. मोदन्ते पितरो नृत्यन्ति देवताः सनाथा चेयं भूमिर्भवति ॥ ६ ॥

७२. नास्ति तेषु जाति-विद्या-रूप-कुल धनक्रियादिभेदः ॥ ७ ॥

७२. यतस्तदीयाः ॥ ८ ॥

वादो हेयः

७४. वादो नावलम्ब्यः ॥ १ ॥

७५. बाहुल्यावकाशत्वादनियतत्वाच्च ॥ २ ॥

भक्तविधेयानि

७६. भक्तिशास्त्राणि मननीयानि तदुद्बोधककर्माण्यपि करणीयानि ॥ १ ॥

७७. सुखदुःखेच्छालाभादित्यक्ते काले प्रतीक्ष्यमाणे क्षणार्द्धमपि व्यर्थं न नेयम् ॥ २ ॥

७८. अहिंसा-सत्य-शौच-दयाऽऽस्तिक्यादिचारित्र्याणि परिपालनीयानि ॥ ३ ॥

७९. सर्वदा सर्वभावेन निश्चिन्तितैर्भगवानेव भजनीयः ॥ ४ ॥

प्रेमभक्तेः फलं श्रेष्ठता च

८०. स कीर्त्यमानः शीघ्रमेवाविर्भवति अनुभावयति च भक्तान् ॥ १ ॥

८१. त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी ॥ २ ॥

८२. गुणमाहात्म्यासक्ति-रूपासक्ति-पूजासक्ति-स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-कान्तासक्ति-वात्सल्यासक्ति-आत्मनिवेदनासक्ति-तन्मयतासक्ति-परमविरहासक्तिरूपा एकधाप्येकादशधा भवति ॥ ३ ॥

८३. इत्येवं वदन्ति जनजल्पनिर्भया एकमताः कुमार-व्यास-शुक-शाण्डिल्य-गर्ग-विष्णु-कौण्डिन्यशेषोद्धवारुणि-बलि-हनुमद्विभिषणादयो भक्ताचार्याः ॥ ४ ॥

८४. य इदं नारदप्रोक्तं शिवानुशासनं विश्वसिति श्रद्धत्ते, स भक्तिमान् भवति, च प्रेष्ठं लभत इति ॥ ५ ॥

इति नारदभक्तिसूत्रम् ।

—:o:—

एवं नारदभक्तिसूत्रे न किञ्चिदाह्निकं नवा कश्चन पादोऽध्यायो वा वर्तते, किन्तु केवलं प्रकरणबोधकानि विभिन्नशीर्षकाणि सन्ति । तत्र महत्त्वपूर्णानि प्राञ्जलया संस्कृतभाषया गुम्फितानि चतुरशीतिः (८४) सूत्राणि सन्ति ।

———

भक्तिमीमांसा

प्रथमाध्याये प्रथमः पादः

१. अथातो भक्तिजिज्ञासा ॥ १ ॥
२. भक्तिर्मनस उल्लासविशेषः ॥ २ ॥
३. भाव एवेयमित्येके ॥ ३ ॥
४. रसस्तु तत्सामग्रीत उत्पत्तेः ॥ ४ ॥

—:०:—

प्रथमाध्याये द्वितीयः पादः

५. स द्विविधो निर्गुणः सगुणश्च ॥ १ ॥
६. अन्त्यो नवविधो भोक्तृभेदात् ॥ २ ॥
७. नवविधश्चैष पुराणादिषु ॥ ३ ॥
८. समानव्यासाभ्यां स पुनस्त्रिविधो विप्रुणदी समुद्रश्च पूर्वपूर्वाभ्यासात् ॥ ४ ॥
९. तद्भेदोऽल्पकालावच्छेदानवच्छेदाभ्याम् ॥ ५ ॥
१०. जातिभेदो वा ॥ ६ ॥
११. साधनेषु भक्तिशब्दो गौणः, आयुर्घृतमितिवत् ॥ ७ ॥

—:०:—

द्वितीयाध्याये प्रथमः पादः

१२. भक्तिर्न जन्या रसो हि सा ॥ १ ॥
१३. नागमविरोधात् ॥ २ ॥
१४. शक्तियोगो बहुविधः पुराणेषु ॥ ३ ॥
१५. स द्विविधः —शुद्धो मिश्रश्च ॥ ४ ॥
१६. मिश्रस्त्रिविधः, कर्मज्ञानतदुभयमिश्रणात् ॥ ५ ॥
१७. आद्यस्य न विधा कर्मज्ञानविरोधात् ॥ ६ ॥
१८. परिपाकापरिपाकावपीतरभेदाविति चेन्न; अवस्थाभेदौ हि तौ ॥ ७ ॥

—:०:—

द्वितीयाध्याये द्वितीयः पादः

१९. त्रिविधः कर्ममिश्रः सात्त्विकादिभेदेन ॥ १ ॥

२०. सात्त्विकस्त्रिविधः, कर्मक्षयविष्ण्वर्पणविधिसिद्ध्यर्थभेदेन ॥ २ ॥

२१. तथा राजसो विषयाद्यभिसन्धिभेदात् ॥ ३ ॥

२२. एवं तामसो हिंसादिफलभेदात् ॥ ४ ॥

२३. ज्ञानमिश्रस्त्वेक एव ॥ ५ ॥

२४. उभयमिश्रश्च त्रिविध उत्तममध्यमप्राकृतभेदेन सत्त्वतारतम्यात् ॥ ६ ॥

२५. कामादयोऽपीति चेन्नाद्याऽन्त्ययोः साधनं हि फलं न भक्तिः कर्मवत् ॥ ७ ॥

२६. मध्यमयोर्न साधनमपि ॥ ८ ॥

—:०:—

तृतीयाध्याये प्रथमः पादः

२७. सर्वं भक्तियोगोऽविशेषात् ॥ १ ॥

२८. त्रिवर्गो वा तस्यैव भक्तिसम्बन्धात् ॥ २ ॥

२९. यथाश्रुतीति चेन्न भक्तिवैषम्यात् ॥ ३ ॥

३०. अपि वा विलम्बाऽविलम्बाभ्यां तदुभयोपपत्तेः ॥ ४ ॥

३१. श्रवणमेव वा सर्वत्र सामर्थ्यसव्यपेक्षो हि विधिः ॥ ५ ॥

३२. स्मरणमपि वा ॥ ६ ॥

३३. उत्तरोत्तरस्मिन् पूर्वः पूर्वश्च ॥ ७ ॥

३४. समुच्चयस्त्वङ्गभावेऽपि ॥ ८ ॥

३५. न चैष विधिर्हेतुनिर्देशात् ॥ ९ ॥

३६. विधिश्चेन्नित्यः स्यात् ॥ १० ॥

—:०:—

तृतीयाध्याये द्वितीयः पादः

३७. इतराणि तदङ्गानि ॥ १ ॥

३८. सर्वं सर्वाण्यविशेषात् प्रयुज्यन्ते ॥ २ ॥

३९. विन्दुना वाद्यानि लौकिकतुल्यसामग्रीको हि सः ॥ ३ ॥

४०. इतराणि तु द्वाभ्याम् ॥ ४ ॥

४१. आरादुपकारीण्यप्येवमिति चेत् ॥ ५ ॥

४२. नोच्छिद्येतैव हि नदी ॥ ६ ॥

४३. पादसेवादिकमप्यङ्गं भयद्वेषवतोस्तदनुत्पत्तेः ॥ ७ ॥
४४. नेह प्रधानानिष्पत्तेः ॥ ८ ॥
४५. अपि चोद्दीपकाभावाल्लौकिकवत् ॥ ९ ॥
४६. सङ्गीतशब्दश्रवणमपि प्रधानं भक्तिकामश्रुतेः ॥ १० ॥
४७. न शब्दप्रधानत्वात् ॥ ११ ॥
४८. गानञ्च स्वकर्तृकम् नियमः ॥ १२ ॥
४९. सङ्गाने नास्ति नियमः ॥ १३ ॥
५०. पर एव वा गायति, अप्रयोज्यं हि तत्तमेवेति श्रुतेः ॥ १४ ॥
५१. श्रवणं तु भक्तमुखतोऽतिशयहेतुः श्रुतेरनुभवाच्च ॥ १५ ॥
५२. सप्तमवर्गोक्ता आद्यवर्गप्रधानस्यापि वाक्यसंयोगात् ॥ १६ ॥
५३. अपि वा नाम्नातवृद्धिधर्मकस्य द्विस्तयापत्तेः ॥ १७ ॥
५४. न च लक्षणा प्रधानधर्मवित्ततिरल्पधर्मकत्वात् ॥ १८ ॥
५५. अपूर्वं वाऽऽम्नातधर्मकत्वात् ॥ १९ ॥
५६. नान्यानर्थक्यं फलतारतम्यादधिकारिभेदाच्च ॥ २० ॥
५७. सप्तमवर्गोक्ता इहापि ॥ २१ ॥
५८. कीर्तनं पुनरुक्तं स्यादिति चेन्न भिन्नं ह्येतत् ॥ २२ ॥
५९. एतेन षष्ठवर्गश्रवणं व्याख्यातम् ॥ २३ ॥
६०. सप्तमवर्गीयास्तु न तत्र यमनियमोपदेशात् ॥ २४ ॥
६१. सङ्कीर्तनं नाम्नां सुस्वरेण सम्बन्धिगानम् ॥ २५ ॥
६२. नवं लक्षणादौ कीर्तनं शब्दसंस्कारकम् ॥ २६ ॥
६३. नमस्कारमात्राङ्गकं च क्वचिच्छ्रवणम् ॥ २७ ॥
६४. अनुपदेशे फलं स्वर्गः स्यात् ॥ २८ ॥
६५. भक्तिर्वानर्थो हि सः २९ ॥
६६. लिङ्गाच्च ॥ ३० ॥
६७. षाष्ठवर्गिकप्रकृतिकमिदं साप्तवर्गिकधर्मकं वा न वा पुनरुपदेशात् ॥ ३१ ॥
६८. नमस्कारोपदेश एवायमिति चेन्नानेकगुणश्रुतेः ॥ ३२ ॥
६९. क्वचित्तु केवलं स्मरणं तदप्येवमेव ॥ ३३ ॥
७०. एतयोरत्युत्तमाधिकारिकत्वम् ॥ ३४ ॥

—: o :—

चतुर्थाध्याये प्रथमः पादः

७१. भक्तेः फलमीश्वरवशीकारः ॥ १ ॥

७२. अनर्थनिवृत्तिरित्येके ॥ २ ॥

७३. तन्न विनाऽपि पुरुषप्रयत्नं निवृत्तेः ॥ ३ ॥

७४. जीवन्मुक्तिः फलं नैष्कर्म्यमपीति श्रुतेः ॥ ४ ॥

७५. नैवमपि बाधितनिवृत्तेः पुरुषानुपेयत्वात् ॥ ५ ॥

७६. उक्तदोषाच्च ॥ ६ ॥

७७. भक्तिरेव परमः पुरुषार्थो मोक्षस्यापुरुषार्थत्वादिति तु भागवताः ॥ ७ ॥

—:०:—

चतुर्थाध्याये द्वितीयः पादः

७८. तानि च भक्तेः श्रूयन्ते हि ॥ १ ॥

७९. नानानभिसंहितानि हि भक्तिर्हि साधनम् ॥ २ ॥

८०. अविशेषाच्चयमिति चेत् ॥ ३ ।

८१. न समुद्रस्तद्वशीकरणविरोधात् ॥ ४ ॥

८२. अन्ययोरपि न त्वं तत्कालेन तद्विरोधादिति चेत्, नैवम्;
प्रागुत्तरवा तत्सम्भवात् ॥ ५ ॥

८३. भक्त्या मामभिजानातीति चतुर्थीसाधनमवि त्येत्याचार्याः ॥ ६ ॥

८४. नदी वा ॥ ७ ॥

८५. मध्यमोत्तमयोर्वशीकारः परिग्रहस्तु त्रयाणाम् ॥ ८ ॥

८६. भक्तिर्नार्थो त्रिनाशयोगाज्जन्यभावो हि ॥ ९ ॥

८७. न हेतुर्जन्यत्ववदप्रयोजकत्वात् ॥ १० ॥

८८. अवच्छेदवत्त्वेनाश्रुतेश्च ॥ ११ ॥

८९. ध्वंसकादृष्टाभावाच्च ॥ १२ ॥

९०. मनोनाशात्तन्नाशश्चेत्तथापि नानार्थ इष्टनाशाननुभवात् ॥ १३ ॥

९१. सामर्थ्यमर्थिता विद्यावाधिकारिविशेषणं नान्यदश्रुतेः ॥ १४ ॥

९२. चतुर्णामेवेतरेषां विद्याविरहात् ॥ १५ ॥

९३. पापनाशसाधनत्वं सर्वेषामिति चेत् ॥ १६ ॥

९४. न विद्याद्यपेक्षानपेक्षाभ्यां विशेषात् ॥ १७ ॥

९५. निरङ्कुशत्वाच्च तस्य तत्र ॥ १८ ॥
९६. अपि वाऽन्येषामपि श्रवणात् ॥ १९ ॥
९७. विद्या कथमिति चेद् गुरूपदेशादितः ॥ २० ॥
९८. पूर्वमीमांसासिद्धान्त एवं सति व्याप्ये [बाध्ये] तेति चेत् ॥ २१ ॥
९९. नाध्ययनविधितोऽधिकारनिर्णयो हि तत्र ॥ २२ ॥
१००. लिङ्गदर्शनाच्च ॥ २३ ॥
१०१. उपलभ्यते च ॥ २४ ॥
१०२. वायदेवादीनामिव जन्मान्तरीणपुराणश्रवणादिसम्भवाच्च ॥ २५ ॥

समाप्तः चेयं भक्तिमीमांसा

एवं भक्तिमीमांसायां चत्वारोऽध्यायाः सन्ति । तत्र प्रत्यध्यायं द्वौ द्वौ पादौ विधेते । तथाच चतुर्षु अध्यायेषु अष्टसु पादेषु च मिलित्वा १०२ सूत्राणि सन्ति । तद् यथा—

१।१—	प्रथमाध्यायस्य	प्रथमे पादे	४	सूत्राणि	सन्ति
१।२—	"	द्वितीये "	७	"	"
२।१—	द्वितीयाध्यायस्य	प्रथमे "	७	"	"
२।२—	"	द्वितीये "	८	"	"
३।१—	तृतीयाध्यायस्य	प्रथमे "	१०	"	"
३।२—	"	द्वितीये "	३४	"	"
४।१—	चतुर्थाध्यायस्य	प्रथमे "	७	"	"
४।२—	"	द्वितीये "	२५	"	"
			१०२		